विद्येति । नवानि नवसंख्यकानि खण्डानि अंशविशेषा यत्र स नवखण्डः नवद्वीप इत्यर्थः । तस्य मध्ये यः श्रीगौराङ्गः विद्याविलासैः न्यायादिनिखिलशास्त्रज्ञानप्रभाभिः नैयायिकाश्च तान्त्रिकाश्च ते तान् ( विशेषणाभ्यां कर्म्मधारय समासः ) तथा स्मार्त्तांश्च सर्व्वान् द्विजान् ब्राह्मणान् जित्वा विरराज शुशुभे । तं ज्ञानरूपं चिन्मयं गौरं प्रणमामि । इन्द्रवज्रावृत्तं ॥ १८ ॥

भक्त्यालापैरिति । तदा अद्वैतमुख्याः अद्वैतप्रभृतयः महान्तः मुरारेः श्रीकृष्णस्य निरवधि सततं अतिशयं अत्यन्तं कीर्त्तनाद्यैः सङ्कीर्त्तनप्रभृतिभिः भक्त्यालापैः भक्तिकथाप्रसङ्गैः यस्य श्रीगौराङ्गचन्द्रस्य आश्रयं प्राप्ताः ( कर्त्तरि क्तः ) यः श्रीगौराङ्गः नित्यानन्दस्य उदयसमयतः आगमनकाले ( सप्तम्यास्तस् ) ईशवत् ईश्वरवत् चेष्टा व्यापारो यस्य तादृशो बभूव । तं नयनसुखदं

य: कोलरूपधृगहो रमणीयमूर्त्ति
र्गुप्ते कृपाञ्च महतीं सहसा चकार।
तं व्यासपूजनविधौ बलदेवभावात्
माध्वीकयाचनपरं परमं स्मरामि॥ २०॥
अद्वैतचन्द्रविभुना सगणेन भक्त्या
नित्यञ्च कृष्णमनुना परिपूजितो य:।
श्रीवासमन्दिरनिधिं परिपूर्णतत्त्वम्
तं श्रीधरादिमहतां शरणं स्मरामि॥ २१॥

---

नेत्रप्रीतिप्रदं (प्रशान्तमूर्त्तित्वादिति भाव:) दक्षिणं सरलान्त:करणं षड्भुजं गौरं वन्दे। अद्वैतप्रभृतयो भक्ता भक्तिपूर्व्वकसङ्कीर्त्तनादिना यं प्रापु:। अथ नित्यानन्दे समागते य: ऐश्वचेष्टादिकं दर्शयामास इति सरलार्थ:। मन्दाक्रान्तावृत्तम्॥ १९॥

य इति। रमणीयमूर्त्ति: सौम्यविग्रहो य: श्रीगौराङ्ग: कोलरूपधृक् वराहमूर्त्तिधर: सन् अहो आश्चर्य्यं गुप्ते मुरारिगुप्ते सहसा महतीं कृपां चकार। व्यासपूजनविधौ व्यासपूजनानुष्ठाने बलदेवभावात् बलदेवभावमवलम्ब्य माध्वीकस्य मधुनो मद्यस्येति यावत् याचनपरं याच्ञापरतन्त्रं तं परमं परमतत्त्वस्वरूपं श्रीगौराङ्गं स्मरामि। वसन्ततिलकं वृत्तं ज्ञेयं वसन्ततिलकं तभजा जगौ ग: इति लक्षणात्॥ २०॥

अद्वैतेति। सगणेन सपरिकरेण अद्वैतचन्द्र एव विभु: तेन भक्त्या नित्यं अहरह: कृष्णमनुना कृष्णमन्त्रेण य: परिपूजित: समर्चित:। तं श्रीवासस्य तन्नाम्नो भक्तस्य यन्मन्दिरं तस्य निधिं परिपूर्णतत्त्वं पूर्णस्वरूपं श्रीधरादिमहतां श्रीधरप्रभृतिमहाजनानां शरणं आश्रयं श्रीगौराङ्गं स्मरामि। वृत्तं पूर्व्ववत्॥ २१॥

श्रीवासपाल्यं यवनं विशोध्य
चक्रे सुभक्तं स्वगुणं प्रदर्श्य।
प्रेम्णा सुमत्तं विषयाद्विरक्तम्
यस्तं प्रभुं गौरविधुं स्मरामि॥ २२॥
श्रीरामरूपधृगहो भिषजो मुरारेः
श्रुत्वा स्तवं रघुपतेर्मुदमाप यो वै।
चक्रे कुसङ्गरहितं कृपया मुकुन्दम्
तं शुद्धभक्तिरसदातिवरं स्मरामि॥ २३॥
आज्ञापयच्च भगवानवधूतदासौ
नामानि गोकुलपते र्नगरेषु दातुम्।

---

श्रीवासेति। यः श्रीमहाप्रभुः स्वगुणं निजगुणं प्रदर्श्य श्रीवासस्य पाल्यं प्रतिपालनीयं यवनं म्लेच्छं विशोध्य पवित्रीकृत्य प्रेम्णा भगवत्प्रेम्णा सुमत्तं एवं विषयात् जगत् प्रपञ्चात् विरक्तं सुभक्तं भक्तकुलश्रेष्ठं चक्रे आर्य्यधर्म्मविरोधिनमपि यवनं करुणया भगवत् प्रेमदानेनोन्मादयामासेति भावः। तं प्रभुं गौरविधुं गौरचन्द्रं स्मरामि। इन्द्रवज्रा वृत्तं॥ २२॥

रामेति। यः श्रीगौराङ्गः रामस्वरूपधृक् श्रीरामचन्द्ररूपधारी सन् भिषजः वैद्यस्य मुरारेः मुरारिगुप्तस्येत्यर्थः (कर्त्तरि ६ष्ठी) रघुपतेः श्रीरामचन्द्रस्य स्तवं श्रुत्वा मुदं हर्षं आप। अपिच कृपया मुकुन्दं कुसङ्गरहितं चक्रे तं शुद्धं निर्म्मलं भक्तिरसं ददातीति यः स चासौ अतिवरश्चेति तं गौराङ्गमिति शेषः स्मरामि। वसन्ततिलकं वृत्तं॥ २३॥

आज्ञापयदिति। यो भगवान् नगरेषु सर्व्वत्र परावराय साधारणायेत्यर्थः जीवनिचयाय प्राणिसमूहाय गोकुलपतेः श्रीकृष्णस्य नामानि दातुं

सर्व्वत्रजीवनिचयेषु परावरेषु
यस्तं स्मरामि पुरुषं करुणावतारम्॥ २४ ॥
योऽद्वैतसद्मविचलन् सह चाग्रजेन
सन्न्यासधर्म्मरहितं ध्वजिनं सुरापम्।
तत्त्वं विशुद्धमवदत् ललिताख्यपुर्य्याम्
तं शुद्धभक्तिनिलयं शिवदं स्मरामि॥ २५ ॥
अद्वैतवादशठताश्रितदेशिकस्य
पृष्ठं व्यताड़यदहो सहसा हरिर्यः।
प्रेम्नापि भक्तिपथगञ्च चकार तं तं
मायाहरं सुविमलं सततं स्मरामि॥ २६ ॥

---

अवधूतदासौ नित्यानन्दहरिदासौ आज्ञापयत् तं करुणया कृपया अवतारो यस्य स तं जीवोद्धाराय समवतीर्णमित्यर्थः पुरुषं स्मरामि। वृत्तं पूर्व्ववत्॥२४॥

य इति। यः श्रीगौराङ्गः अग्रजेन अग्रजातेन नित्यानन्देनेत्यर्थः अद्वैतस्य तन्नाम्नो भक्तस्य सद्म भवनं शान्तिपुरमिति यावत् विचलन् गच्छन् ललिताख्यपुर्य्यां ललितपुरनामकनगरे ध्वजिनं धर्म्मध्वजिनं सन्न्यासधर्म्मरहितं सुरापं मद्यपायिनं कमपि सन्न्यासिनं विशुद्धं तत्त्वं अवदत् उपदिदेश। तं शुद्धभक्तिनिलयं विशुद्धभक्तिरसाश्रयं शिवदं कल्याणप्रदं श्रीगौराङ्गं स्मरामि। वृत्तं पूर्व्ववत्॥ २५ ॥

अद्वैतेति। यः हरिः श्रीगौराङ्गः सहसा हठात् अद्वैतो वादो वाक्यं यस्य सः अद्वैतवादः अद्वैतवादीत्यर्थः शठतां कपटतां आश्रितः शठताश्रितः (द्वा काश्रिताद्यैः सः इति द्वितीयासमासः) अद्वैतवादश्च शठताश्रितश्चासौ देशिकश्च इति तस्य, अद्वैतवादिनोऽद्वैताचार्य्यस्येत्यर्थ पृष्ठं पृष्ठदेशं

श्रीरूपधृग्भजनसागरमग्ननृभ्यो
यश्चन्द्रशेखरगृहे प्रददौ स्वदुग्धम्।
स्वां दर्शयन् विजयमुद्धरति स्म भूतिम्
तं सर्व्वशक्तिविभवाश्रयणं स्मरामि॥ २७॥

निद्रात्यागः स्नपनमशनं गोद्रुमादौ विहारो
ग्रामे ग्रामे विचरणमहो कीर्त्तनञ्चाल्पनिद्रा।
यामे यामे क्रमनियमतो यस्यभक्तै र्बभूवु
स्तं गौराङ्गं भजनसुखदं ह्यष्टयामं स्मरामि॥ २८॥

---

व्यताड़यत् करैराहतवान् इत्यर्थः। अपिच तं अद्वैताचार्य्यं प्रेम्णा भक्तिपथगं भक्तिमार्गानुयायिनं चकार। तं मायाहरं मायाविनाशिनं सुविमलं सततं स्मरामि। वृत्तं पूर्व्ववत्॥ २६॥

श्रीरूपेति। यः प्रभुः श्रीरूपधृक् महालक्ष्मीरूपधारी सन् चन्द्रशेखर गृहे चन्द्रशेखरभवने भजनसागरे मग्ना ये नराः तेभ्यः भजनपरतन्त्रमानवेभ्यः स्वदुग्धं निजदुग्धं प्रददौ समर्पयामास। अपिच स्वां स्वकीयां विभूतिं वैभवं दर्शयन् विजयं विजयनामकभक्तं उद्धरति स्म तं सर्वशक्तिविभवानां आश्रयणं आस्पदं स्मरामि वृत्तं पूर्व्ववत्॥ २७॥

निद्रात्याग इति। यस्य श्रीमन्महाप्रभोः यामे यामे प्रहरे प्रहरे क्रमनियमानुसारेण भक्तैः भक्तगणैः एतानि बभूवुः कानि तदाह निद्रात्यागः निशान्ते निद्रापरित्यागः अथ स्नपनं स्नानं एवं अशनं भोजनं एवं गोद्रुमादौ विहारः तथा ग्रामे ग्रामे विचरणं कीर्त्तनं, तथा पूर्व्वाह्णे गोद्रुमोपवने कीर्त्तनविहारः मध्याह्ने मध्यद्वीपाद्यौ कीर्त्तनादिलीला अपराह्णे मायापुरागमनं सन्ध्याकाले स्वगृहे कृत्य समापनं प्रदोषे श्रीवासाङ्गने हरिचर्च्चा रात्रौ कीर्त्तनं

योवै सङ्कीर्त्तनपरिकरैः श्रीनिवासादिसङ्घै
स्तत्‌रत्यानां पतितजगदानन्दमुख्यद्विजानाम्।
दुर्वृत्तानां हृदयविवरं प्रेमपूर्णं चकार
तं गौराङ्गं पतितशरणं प्रेमसिन्धुं स्मरामि॥ २९॥
भावावेशैर्निखिलसुजनान् शिक्षयामास भक्तिम्
तेषां दोषान् सदयहृदयो मार्ज्जयामास साक्षात्।
भक्तिव्याख्यां सुजनसमितौ यो मुकुन्दश्चकार
तं गौराङ्गं स्वजनकलुषक्षान्तिमूर्त्तिं स्मरामि॥ ३०॥

अथ अल्पनिद्रा। तं भजनसुखदं गौराङ्गं अष्टयामान् अष्टप्रहरान् (अत्यन्त संयोगे द्वितीया) स्मरामि। मन्दाक्रान्ता वृत्तं॥ २८॥

य इति। यः प्रभुः सङ्कीर्त्तनपरिकरैः श्रीनिवासादिसङ्घैः श्रीनिवासादि-भक्तसमूहैः सह तत्रत्यानाम् नवद्वीपसम्भूतानां दुर्वृत्तानाम् पतिता जगदा-नन्दमुख्याः जगदानन्दप्रभृतयः ये द्विजा स्तेषां हृदयविवरं प्रेमपूर्णं चकार तं पतितशरणम् प्रेमसिन्धुं प्रेमसागरं गौराङ्गं स्मरामि। श्रीगौराङ्गसङ्कीर्त्तन-समये जगदानन्दप्रभृतीनाम् दुर्वृत्त सुरापायिनां ब्राह्मणानां अतिनिष्ठुर-हृदयमपि हरिगुणगानैरार्द्रं चकार इति सरलार्थः। पूर्ब्ववद्वृत्तं॥ २९॥

भावावेशैरिति। यो मुकुन्दः श्रीगौराङ्गः भावावेशै स्तम्भस्वेदादि-भावावेशैः निखिलसुजनां समस्तभक्तजनान् भक्तिं शिक्षयामास एवं सदय-हृदयः दयालुः सन् तेषां दोषान् साक्षात् मार्जयामास, अपिच सुजनानां साधूनां समितौ सभायां भक्तिव्याख्यां चकार तं स्वजनानां आत्मीयजनानां यत् कलुषं पापं तस्य क्षान्तिः क्षमा यस्मात्तादृशी मूर्त्तिर्यस्य स तं गौराङ्गं स्मरामि। सात्विकभावाश्च "स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः। वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकाः स्मृताः इति। वृत्तं पूर्ब्ववत्॥ ३०॥

यो वै सङ्कीर्त्तनसुखरिपुं चान्दकाजीं विशोध्य
लास्योल्लासैर्नगरनिचये कृष्णगीतं चकार।
वारम्बारं कलिगदहरं श्रीनवद्वीपधाम्नि
तं गौराङ्गं नटनविवशं दीर्घबाहुं स्मरामि॥ ३१॥
गङ्गादासो मुररिपुभिषक् श्रीधरः शुक्लवस्त्रः
सर्व्वे यस्य प्रणतिनिरताः प्रेमपूर्णा बभूवुः।
यस्योच्छिष्टाशनसुरतिका श्रीलनारायणी च
तं गौराङ्गं परमपुरुषं दिव्यमूर्त्तिं स्मरामि॥ ३२॥
श्रीवासस्य प्रणयविवशस्तस्य सूनोर्गतासो-
र्वक्त्रात्तत्त्वं परमशुभदं श्रावयामास तस्मै।

---

य इति। यः प्रभुः सङ्कीर्त्तनेन यत् सुखं तस्य रिपुं सङ्कीर्त्तनविरोधिनमित्यर्थः „चान्दकाजीं तन्नामानं कञ्चित् जनं विशोध्य श्रीनवद्वीपधाम्नि नगरनिचये नगरसमूहे लास्योल्लासैः नृत्यविलासैः सह कलिगदहरं कलिकलुषहरं कृष्णगीतं वारम्बारं चकार तं नटनविवशं नृत्यमत्तं दीर्घबाहुं आजानुलम्बितकरं गौराङ्गं स्मरामि। वृत्तं पूर्व्ववत्॥ ३१॥

गङ्गादास इति। गङ्गादासः मुररिपुभिषक् मुरारिगुप्तो नाम वैद्यः श्रीधरः तथा शुक्लवस्त्रः शुक्लाम्बर ब्रह्मचारी, सर्वे यस्य प्रणयनिरताः सन्तः प्रेमपूर्णा बभूवुः। तथा श्रील नारायणी यस्य श्रीगौराङ्गस्य उच्छिष्टाशनेन सुरतिरनुरागी यस्यास्तादृशी बभूवेति शेषः। तं परमपुरुषं दिव्यमूर्त्तिं गौराङ्गं स्मरामि। वृत्तं पूर्व्ववत्॥ ३२॥

श्रीवासस्येति। यः परात्मा श्रीगौराङ्गः श्रीवासस्य तदाख्यभक्तस्य

तद्दासेभ्योऽपिच शुभमतिं दत्तवान् यः परात्मा
वन्दे गौरं कुहकरहितं जीवनिस्तारकं तम् ॥ ३३ ॥
गोपीभावात् परमविवशो दण्डहस्तः परेशो-
वादासक्तानतिजड़मतीन् ताड़यामास मूढ़ान्।
तस्मात्ते यत् प्रतिभटतया वैरभावानतन्वन्
तं गौराङ्गं विमुखकदने दिव्यसिंहं स्मरामि ॥ ३४ ॥
तेषां पापप्रशमनमतिः कण्टके माघमासे
लोकेशाच्चिप्रमवयसि यः केशवाख्यासलिङ्गं।

प्रणयविवशः बभूवेति शेषः। एवं तस्य श्रीवासस्य गतासोर्म्मृतस्य सूनोः पुत्रस्य वक्त्रात् तस्मै श्रीवासाय (क्रियाशेषे चतुर्थी) परमं शुभदं तत्त्वं श्रावयामास। अपिच तद्दासेभ्यः श्रीवासदासेभ्यः अपि शुभमतिं दत्तवान् तं कुहकरहितं अकपटं जीवनिस्तारकं गौरं वन्दे। वृत्तं पूर्व्ववत् ॥ ३३ ॥

गोपीभावादिति। यः परेशः परमेश्वरः गोपीभावात् गोपीभावमवलम्ब्य (यवर्थे पञ्चमी) परम विवशः गोपी गोपीति कीर्त्तनोन्मत्तः वादासक्तान् प्रभोस्ताद्दशभावदर्शनेनोपहासवादपरान् अतिजड़मतीन् अतएव मूढ़ान् मूर्खान् दण्डहस्तः सन् ताड़यामास, तस्माद्धेतोः ते मूढ़ाः प्रतिभटतया प्रतिद्वन्दितया वैरभावान् शात्रवानि अतन्वन् अकुर्व्वन्। कदाचित् प्रभुः गोपी गोपीति समुच्चार्य्य गोपीभावाविष्टो विचारासक्तैर्मुढ़ैश्छात्रसमूहैरुपहसितस्तान् दण्डमुद्यम्य ताड़यामास तेऽपि मूढ़ास्तं प्रति वैरिता माचेरुरिति सरलार्थः। तं विमुखानां नास्तिकानां कदने दिव्यसिंहं गौराङ्गं स्मरामि। वृत्तं पूर्व्ववत् ॥ ३४ ॥

तेषामिति। तेषां छात्राणां पापप्रशमने मतिर्यस्य ताद्दशः यः परम-

लेभे लोके परमविदुषां पूजनीयोवरेण्य-
स्तं चैतन्यं कचविरहितं दण्डहस्तं स्मरामि ॥ ३५ ॥
त्यक्त्वा गेहं स्वजनसहितं श्रीनवद्वीपभूमौ
नित्यानन्दप्रणयवशगः कृष्णचैतन्यचन्द्रः ।
भ्रामं भ्रामं नगरमगमच्छान्तिपूर्वं पुरं य-
स्तं गौराङ्गं व्रजजिगमिषाविष्टमूर्त्तिं स्मरामि ॥ ३६ ॥

---

विदुषां पण्डितवराणां पूजनीयो वरेण्यः श्रेष्ठः प्रभुः माघमासे कण्टके तदाख्यनगरे (काँटोया इति यस्य भाषा) लोकेश्रीब्रह्मारीढ़्दिणीनत्त्वचाधिगत्वा-त्तुःसंख्याबोधकः अच्चि नेत्रं जीवानां द्विनेत्रत्वात् द्विसंख्या बोधकं मिलित्वा अङ्कस्य वामगतितया चतुर्व्विंशतिसंख्या आयाता तत्प्रमं तत्परिमितं यत् वयः तस्मिन् केशवात् केशवभारतीनाम्नो जनात् न्यासलिङ्गं सन्न्यासं लेभे अङ्गी-चकार। तं कचैः केशैर्विरहितं शून्यं मुण्डितमस्तकमित्यर्थः दण्डहस्तं चैतन्यं स्मरामि। वृत्तं पूर्व्ववत् ॥ ३५ ॥

त्यक्त्वागेहमिति। यः कृष्णचैतन्यचन्द्रः श्रीनवद्वीपभूमौ स्वजनसहितं मातादिसहितं गेहं त्यक्त्वा नित्यानन्दस्य प्रणयवशगः सन् भ्रामं भ्रामं परि-भ्रमन्नित्यर्थः शान्तिपूर्व्वं पुरं तन्नाम नगरं अगमत् ययौ। तं व्रजे या जिग-मिषा गमनेच्छा तया आविष्टा मूर्त्तिर्यस्य स तं व्रजं गन्तव्यमिच्छन्तं गौराङ्गं स्मरामि। श्लोकेऽस्मिन् शान्तिपूर्व्वं पुरमित्यत्रावाच्य वचनदोषः "यदेवावाच्य वचनमवाच्य वचनं हि तदिति" समाधानं। ईदृशो दोषो ग्रन्थान्तरेऽपि दृष्टो यथा "हिरण्यपूर्व्वं कशिपुं प्रचक्षते"इति माघः "देवपूर्व्वं गिरिन्ते" इति "धनुरुपपदमस्मै वेदमत्यादिदेश" इति च कालिदासः। वृत्तं पूर्व्ववत् ॥ ३६ ॥

तत्रानीतात्वजितजननी हर्षशोकाकुला सा
भिक्षां दत्त्वा कतिपयदिवा पालयामास सूनुं।
भक्त्या यस्तद्विधिमनुसरन् चैत्रयात्रां चकार
तं गौराङ्गं भ्रमणकुशलं न्यासिराजं स्मरामि ॥३७॥

नित्यानन्दो विबुधजगदानन्द दामोदरौ च
लीलागाने परमनिपुणो दत्तसूतो मुकुन्दः।
एते भक्ताश्चरणमधुपा येन सार्द्धं प्रचेलु-
स्तं गौराङ्गं प्रणतपटलप्रेष्ठमूर्त्तिं स्मरामि ॥ ३८ ॥

---

तत्रेति। तत्र शान्तिपुरे आनीता श्रीअद्वैतभवने समानीता अजित जननी सा शचीदेवी हर्षेण तनयमुखदर्शनेन शोकेन च स्वपुत्रस्य सन्न्यासित्वात् आकुला सती भिक्षां दत्त्वा कतिपय दिवा सूनुं पुत्रं पालयामास। अपि च यः भक्त्या तद्विधिं मातृविधानं अनुसरन् चैत्रयात्रां चकार तं भ्रमणकुशलं न्यासिराजं सन्न्यासिश्रेष्ठं गौराङ्गं स्मरामि। भिक्षां दत्त्वा सूनुं पालयामासेत्यत्र सूनुपदस्य दत्त्वेति क्रिया सम्बन्धात् पालयामासेति क्रिया सम्बन्धाच्च सम्प्रदानत्वकर्म्मत्व सन्देहे कर्म्मत्वमेव न्याय्यं। तथाच अपादान सम्प्रदान करणाधारकर्म्मणां कर्त्तुश्चान्योऽन्य सन्देहे परमेकं प्रवर्त्तत इति कारिका। वृत्तं पूर्ब्ववत् ॥ ३७ ॥

नित्यानन्द इति। नित्यानन्दः विबुधजगदानन्ददामोदरौ पण्डितजगदानन्दस्तथा पण्डित दामोदरः तथा भगवल्लीलागाननिपुणो वैद्यवंशीय मुकुन्ददत्तः। एते भक्ताः चरणयोः श्रीमन्महाप्रभोः पदयोर्मधुपाः भृङ्गाः येन प्रभुना सार्द्धं प्रचेलुः पुरुषोत्तमं ययुः तं प्रणतपटलस्य भक्तसमूहस्य प्रेष्ठा प्रिया मूर्त्तिर्यस्य स तं गौराङ्गं स्मरामि। श्लोकेऽस्मिन् नित्यानन्दादिभक्तेषु मधुपत्वारोपेन

त्यक्त्वा गङ्गातटजनपदां श्वाम्बुलिङ्गं महेशं
ओड्रे देशे रमणविपिने चौरचौरं ददर्श।
गोपालं वै कटकनगरे यो ददर्शात्मरूपं
तं गौराङ्गं स्वभजनपरं भक्तमूर्त्तिं स्मरामि॥ ३९॥
एकाम्राख्ये पशुपतिवने रुद्रलिङ्गं प्रणम्य
यातः कापोतकशिवपुरं स्वस्यदण्डं विहाय।
नित्यानन्दस्तु तदवसरे यस्यदण्डं बभञ्ज
तं गौराङ्गं कपटमनुजं भक्तभक्तं स्मरामि॥ ४०॥

---

चरणयोः पद्मत्वारोप तात्पर्य्यमायातं तथाच पद्माश्रयस्य भृङ्गस्य पद्मं विना स्थिते रसम्भवात् सुष्ठूक्तं चरणपद्माभ्यां सार्द्धं भक्तभृङ्गानां गमनं। वृत्तं पूर्व्ववत्॥ ३८॥

त्यक्तेति। यः प्रभुः गङ्गातटे गङ्गातीरे ये जनपदा देशाः (नीवृज्जनपदो देश इत्यमरः) तान् त्यक्त्वा विहाय छत्रभोगे अम्बु लिङ्गं महेशं अम्बुलिङ्गाख्य महादेवं ददर्श। तथा ओड्रे देशे उत्कल देशे रमणविपिने तदाख्य स्थाने चौरचौरं गोपीनाथं ददर्शेति शेषः। एवं कटकनगरे आत्मरूपं आत्मस्वरूपं गोपालं ददर्श। तंस्वभजनपरं आत्मभजनपरतन्त्रं (स्वस्यैव भगवत्त्वादिति भावः) भक्तमूर्त्तिं गौराङ्गं स्मरामि। वृत्तं पूर्व्ववत्॥ ३९॥

एकाम्रेति। यः श्रीगौराङ्गः एकाम्राख्ये एकाम्रनामके तीर्थे पशुपति वने शिववने रुद्रलिङ्गं महादेवं प्रणम्य नमस्कृत्य स्वस्य निजस्य दण्डं विहाय परित्यज्य कापोतकशिवपुरं कपोतेश्वरशिवदर्शनार्थं कपोतेश्वरशिवनगरं यातः जगाम। नित्यानन्दस्तु तदवसरे तस्मिन् समये यस्य प्रभोः दण्डं बभञ्ज। तं कपटमनुजं भक्तरूपमीश्वरं भक्तभक्तं भक्तप्रियं गौराङ्गं स्मरामि। वृत्तं पूर्व्ववत्॥ ४०॥

भग्ने दण्डे कपटकुपितस्तान् विहाय स्ववर्गा-
नेकोनीलाचलपतिपुरं प्राप्य तूर्णं प्रभुर्यः।
भावावेशं परममगमत् कृष्णरूपं विलोक्य
तं गौराङ्गं पुरटवपुषं न्यस्तदण्डं स्मरामि॥ ४१॥
भावास्वादप्रकटसमये सार्व्वभौमस्य सेवा
तस्यानर्थान् प्रकृतिविपुलान् नाशयामास सर्व्वान्।
तस्माद्यस्य प्रबलकृपया वैष्णवोऽभूत् स चापि
तं वेदार्थ-प्रचरणविधौ तत्त्वमूर्त्तिं स्मरामि॥ ४२॥

---

भग्न इति। यः प्रभुः दण्डे भग्ने सति कपटकुपितः व्याजक्रुद्धः सन् तान् स्ववर्गान् आत्मभक्तान् विहाय परित्यज्य एकः एकाकी सन् नीलाचलपतेः नीलाद्रिनाथस्य पुरं श्रीमन्दिरं तूर्णं शीघ्रं प्राप्य कृष्णरूपं विलोक्य दृष्ट्वा परमं भावावेशं अगमत् प्राप। भगवान् श्रीगौराङ्गः कपोतेश्वरात् प्रत्यागत्य भग्नदण्डस्य वार्त्तामाकर्ण्य कपटक्रोधमङ्गीकृत्य नीलाद्रिनाथस्य श्रीमन्दिरं जगाम तत्र च कृष्णरूपं विलोक्य भावाविष्टो बभूवेति सरलार्थः। तं कनकवपुषं स्वर्णकान्तिं न्यस्तदण्डं विगतदण्डं गौराङ्गं स्मरामि। वृत्तं पूर्व्ववत्॥४१॥

भावास्वादेति। भावास्वादस्य प्रभोर्भावावेशस्य प्रकट समये प्रकाशकाले यदा यदा प्रभुर्भावाविष्टो बभूव तदा तदेति भावः। सार्व्वभौमस्य वासुदेवसार्व्वभौमस्य ( कर्त्तरि षष्ठी ) सेवा महाप्रभुसेवा तस्य सार्व्वभौमस्य प्रकृत्या स्वभावेन विपुलान् महतः सर्व्वान् निखिलान् अनर्थान् मायावादगतानिति शेषः। नाशयामास अपाचकार। प्रभोर्भावावेशकाले वासुदेवसार्व्वभौमः यत् प्रभुं सेवितवान् तत एव तस्य मायावादाद्यनर्थोऽपजगाम इत्यर्थः तस्मात् यस्य प्रभोः प्रबलकृपया स सार्व्वभौमोऽपि वैष्णवोऽभूत्, तं वेदार्थस्य

तत्रोषित्वा कतिपयदिवा दाक्षिणात्यं जगाम
कूर्म्मक्षेत्रे गदविरहितं वासुदेवं चकार।
रामानन्दे विजयनगरे प्रेमसिन्धुं ददौ य
स्तं गौराङ्गं जनसुखकरं तीर्थमूर्त्तिं स्मरामि॥ ४३॥
देशे देशे सुजननिचये प्रेमविस्तारयन् यो
रङ्गक्षेत्रे कतिपयदिवा भट्टपल्लग्रामवात्सीत्।
भट्टाचार्य्यान् परमकृपया कृष्णभक्तांश्चकार
तं गोपालालयसुखनिधिं गौरमूर्त्तिं स्मरामि॥ ४४॥

---

प्रचरणं प्रचारः तस्मिन् विधौ व्यापारे तत्त्वमूर्त्तिं गौराङ्गं स्मरामि। वृत्तं पूर्व्ववत्॥ ४२॥

तत्रेति। तत्र श्रीपुरुषोत्तमे यः प्रभुः कतिपयदिवा कियद्दिनानि उषित्वा दाक्षिणात्यं दाक्षिणात्यदेशं जगाम। तथा कूर्म्मक्षेत्रे वासुदेवं गदविरहितं स्पर्शद्वारा कुष्ठरोगनिर्म्मुक्तं चकार। एवं विजयनगरे गोदावरीतीरे विद्यानगरे यः रामानन्दे तदाख्यजने (विषयविवक्षया सप्तमी) प्रेमसिन्धुं ददौ समर्पयामास। तं जनानां सुखकरं प्रीतिजनकं तीर्थमूर्त्तिं गौराङ्गं स्मरामि। वृत्तं पूर्व्ववत्॥ ४३॥

देश इति। देशे देशे दाक्षिणात्यस्य स्थाने स्थाने यः प्रभुः सुजनानां साधुजनानां निचये समूहे (विषये सप्तमी) प्रेम विस्तारयन्, रङ्गक्षेत्रे भट्टानां पल्ल्यां कतिपयदिवा चतुर्म्मासान् अवात्सीत् उवास (वसधातोर्लुङ्)। एवं तत्र परमकृपया भट्टाचार्य्यान् श्रीसम्प्रदायिविमल्ल-वेङ्कट-प्रबोधानन्दसरस्वती प्रभृतीन् इत्यर्थः। कृष्णभक्तान् चकार तं गोपालस्य वेङ्कटपुत्रगोपाल-

बौद्धान् जैनान् भजनरहितान् तत्त्ववादाहतांश्च
मायावादह्रदनिपतितां शुद्धभक्तिप्रचारैः ।
सर्व्वांश्चैतान् भजनकुशलान् यश्चकारात्मशक्त्या
वन्देऽहं तं बहुमतधियां पावनं गौरचन्द्रम् ॥ ४५ ॥
दत्वानन्दं कलिमलहरं दाक्षिणात्येभ्य ईशो
नीत्वा ग्रन्थौ भजनविषयौ कृष्णदासेन सार्द्धं ।
आलालेशालयपथगतं नीलशैलं ययौ य
स्तं गौराङ्गं प्रमुदितमतिं भक्तपालं स्मरामि ॥ ४६ ॥

भट्टगोस्वामिनः य आलयः गृहं तत्र सुखनिधिं प्रीतिकरनिधिस्वरूपं ( तेषामतीवादरणीयत्वादिति भावः ) गौरमूर्त्तिं स्मरामि । वृत्तं पूर्व्ववत् ॥४४॥

बौद्धानिति । यः प्रभुः आत्मनः शक्त्या स्वमायया एतान् सर्वान् बौद्धान् तथा जैनान् तथा भजनरहितान् भक्तिशून्यान् तथा तत्त्ववादाहतान् तथा मायावाद एव ह्रद स्तत्र निपतितान् मायावादपरानित्यर्थः शुद्धभक्तिप्रचारैः विशुद्धभक्तिख्यापनैः भजनकुशलान् भक्तिप्रवणान् चकार । तं बहुमतधियां नानामतवादपराणां पावनं भगवत्प्रेमप्रदानेन शोधनं गौरचन्द्रं अहं वन्दे अभिवादये । वृत्तं पूर्व्ववत् ॥ ४५ ॥

दत्वानन्दमिति । यः ईशः प्रभुः दाक्षिणात्येभ्यः दाक्षिणात्यदेशवासिभ्यो जनेभ्यः कलिमलहरं कलिकलुषविनाशिनं आनन्दं कृष्णानन्दं दत्वा भजनविषयौ ग्रन्थौ श्रीब्रह्मसंहिता श्रीकृष्णकर्णामृतग्रन्थौ नीत्वा संगृह्य कृष्णदासेन बधिर कृष्णदास भक्तेन सार्द्धं आलालेशालयस्य आलालनाथस्य य आलयः मन्दिरं तत् पथगतं नीलशैलं नीलाद्रिं ययौ । तं प्रमुदितमतिं हृष्टचेतसं भक्तपालं भक्तपालकं गौराङ्गं स्मरामि । वृत्तं पूर्व्ववत् ॥ ४६ ॥

काशीमिश्रद्विजवरगृहे शुद्धचामीकराभो
वासञ्चक्रे स्वजननिकरै र्यः स्वरूपप्रधानैः ।
नामानन्दं सकल समये सर्व्वजीवाय योऽदात्
तं गौराङ्गं स्वजनसहितं फुल्लमूर्त्तिं स्मरामि ॥ ४७ ॥
नीलागेशे रथमधिगते वैष्णवै र्यं स्तदग्रे
नृत्यन् गायन् हरिगुण-गणं प्लावयामास सर्व्वान् ।
प्रेम्नौड्रीयान् गजपति-मुखान् सेवकान् शुद्धभक्तां
स्तं गौराङ्गं स्वसुखजलधिं भावमूर्त्तिं स्मरामि ॥४८॥
ओड्रदेशाद्ययौ गौड़ं सीमायामुत्कलस्य यो ।

---

काशीमिश्रेति । शुद्धं विशुद्धं चामीकरं सुवर्णं तद्वत् आभा यस्य सः शुद्धसुवर्णवर्ण इत्यर्थः । यः श्रीगौराङ्गः काशीमिश्रस्य क्षेत्रनिवासिनस्तदाख्यस्य द्विजवरस्य ब्राह्मणस्य गृहे भवने स्वरूपप्रधानैः स्वरूपदामोदरमुखैः स्वजननिकरैः भक्तगणैः (गम्यमान सहार्थे तृतीया) वासं चक्रे । यः प्रभुः सकलसमये सर्व्वदा सर्व्वजीवाय नामानन्दं हरिनामानन्दं अदात् प्रदत्तवान् तं स्वजनसहितं भक्तगणसहितं फुल्लमूर्त्तिं गौराङ्गं स्मरामि वृत्तं पूर्व्ववत् ॥ ४७ ॥

नीलागेश इति । नीलागेशे नीलाद्रिनाथे रथं अधिगते आरूढ़े सति यः प्रभुः तदग्रे नीलाद्रिनाथस्याग्रे नृत्यन् हरिगुणगणं गायन् प्रेम्ना सर्व्वान् गजपतिमुखान् गजपतिप्रभृतीन् शुद्धभक्तान् औड्रीयान् ओड्रदेशवासिनः सेवकान् प्लावयामास आर्द्रीचकार । तं स्वस्य आत्मनः सुखजलधिं सुखसमुद्रं भावमूर्त्तिं गौराङ्गं स्मरामि । वृत्तं पूर्व्ववत् ॥ ४८ ॥

ओड्रदेशादिति । यः देवः ओड्रदेशात् उत्कलस्य उत्कलदेशस्य

हित्वौड्रपार्श्वदां देवस्तं स्मरामि शचीसुतं ॥ ४६ ॥
श्रीवासं वासुदेवञ्च राघवं स्व स्व मन्दिरे ।
दृष्ट्वा शान्तिपुरं यातो यस्तं गौरं स्मराम्यहं ॥ ५० ॥
श्रीविद्यानगरं गच्छन् विद्यावाचस्पते र्गृहं ।
कुलियायां नवद्वीपे ययौ यस्तमहं भजे ॥ ५१ ॥
विद्यारूपोद्भवधनजनैर्यानलभ्या नरेण
तां चैतन्यप्रभुवरकृपां दैन्यभावादवाप ।

---

सीमायां औड्रपार्श्वदान् औड्रदेशवासिभक्तान् हित्वा परित्यज्य तं। शचीसुतं गौराङ्गं स्मरामि ॥ ४९ ॥

श्रीवासमिति। यः प्रभुः श्रीवासं वासुदेवं तथा राघवं स्वस्वमन्दिरे निजनिजनगरे इत्यर्थः तथाच श्रीवासं कुमारहट्टनामके नगरे वासुदेवदत्तं काञ्चनपल्लीनामके नगरे राघवपण्डितञ्च पाणिहाटीनामके नगरे दृष्ट्वा शान्तिपुरं यातः तं गौरं अहं स्मरामि ॥ ५० ॥

श्रीविद्येति। यः प्रभुः नवद्वीपे श्रीविद्यानगरे नवद्वीपान्तर्गतविद्यानगर इत्यर्थः। विद्यावाचस्पतेः पण्डितस्य गृहं भवनं गच्छन् कुलियायां तदाख्यनगरे ययौ माधवदासभवनमिति शेषः। तं गौरचन्द्रं अहं भजे। कदाचित् भगवान् श्रीगौरचन्द्रः शान्तिपुरात् नवद्वीपान्तर्गतविद्यानगरं गच्छन् कुलियानगरे माधवदासभवनं जगाम इति सरलार्थः ॥ ५१ ॥

विद्यारूपेति। देवानन्दः तदाख्यभक्तः कुलियनगरे यस्य प्रभोर्भक्तान् प्रपूज्य समर्च्य दैन्यभावात् दैन्यमवलम्ब्येत्यर्थः। तां चैतन्यप्रभुवरस्य कृपां अवाप लेभे। या कृपा नरेण मानवेन कर्त्रा विद्या च रूपञ्च उद्भवो जन्म च धनञ्च जनश्च ते तैः करणैः न लभ्या प्राप्या महाप्रभौ कुलियनगरे समुपस्थिते,

देवानन्दः कुलियनगरे यस्य भक्तान् प्रपूज्य
वन्दे गौरं विमदविदुषां शुद्धभक्त्यैकलभ्यं ॥ ५२ ॥
वृन्दारण्येक्षणकपटतो गौड़देशे प्रसूतिं
दृष्ट्वा स्नेहाद्‌यवनकवलात् साग्रजं रूपमेव ।
उद्धृत्यौड्रं पुनरपि ययौ यः स्वतन्त्रः परात्मा
तं गौराङ्गं स्वजनतरणे हृष्टचित्तं स्मरामि ॥ ५३ ॥
सङ्गं हित्वा बहुविधनृणां भद्रमेकं गृहीत्वा
यातां वृन्दावनदृढ़मतिर्यश्चकारात्मतन्त्रः ।
ऋक्षव्याघ्रप्रभृतिकपशून् मादयित्वात्मशक्त्या
तं स्वानन्दैः पशुमतिहरं गौरचन्द्रं स्मरामि ॥ ५४ ॥

---

या चैतन्यकृपा न विद्यया न रूपेण न सत्कुलजन्मना न धनेन न च अनेन जीवैर्लभ्यते देवानन्दस्तु भगवद्भक्तपूजनेन दीनतया च तां चैतन्यकृपां प्रापेति सरलार्थः। तं विमदविदुषां निरहङ्कारपण्डितानां शुद्धभक्त्या एको लभ्यस्तं गौरं वन्दे अभिवादये। मन्दाक्रान्ता वृत्तम् ॥ ५२ ॥

वृन्दारण्येति। परात्मा अतएव स्वतन्त्रः स्वाधीनो यः प्रभुः वृन्दारण्यस्य वृन्दावनस्य ईक्षणं दर्शनं तस्य कपटात् ( पञ्चम्याः तस् ) वृन्दावनदर्शनच्छला-दित्यर्थः। गौड़देशे प्रसूतिं जननीं दृष्ट्वा स्नेहात् यवनकवलात् होसेनसाहा-नामकयवनसम्राट् हस्तात् साग्रजं ज्येष्ठसहितं रूपं रूपसनातनं उद्धृत्य पुन-रपि औड्रं ययौ। तं स्वजनानां भक्ततया आत्मीयानां तरणे उद्धारे हृष्ट-चित्तं गौराङ्गं स्मरामि। वृत्तं पूर्ववत् ॥ ५३ ॥

सङ्गमिति। आत्मतन्त्रः स्वाधीन. यः प्रभुः बहुविधनृणां सङ्गं हित्वा परित्यज्य एकं केवलं भद्रं बलभद्रभट्टाचार्य्यं गृहीत्वा सहायीकृत्येत्यर्थः

वृन्दारण्ये गिरिवरनदीन् ग्रामराजीं विलोक्य
पूर्व्वं क्रीड़ास्मरणविवशो भावपुञ्जैर्मुमोह ।
तस्माद्भद्रो व्रजविपिनतश्चालयामास यञ्च
तं गौराङ्गं निजजनवशं दीनमूर्त्तिं स्मरामि ॥ ५५ ॥

---

वृन्दावने दृढ़ा मतिर्यस्य सः वृन्दावनगमनाभिलाषीसन्नित्यर्थः । आत्मशक्त्या ऋक्षव्याघ्रप्रभृतिकपशून् भल्लुकव्याघ्रप्रभृतिजन्तून् मादयित्वा कृष्णभक्त्या उन्मत्तीकृत्य यात्रां वृन्दावनयात्रां चकार । तं स्वानन्दैः स्वकीयानन्दद्वारा पशुमतिहरं पशुचित्तमोहनं गौरचन्द्रं स्मरामि । वृत्तं पूर्ववत् ॥ ५४ ॥

वृन्दारण्य इति । यः प्रभुः वृन्दारण्ये वृन्दावने गिरिवरो गोवर्द्धनः नदी यमुना ग्रामराजयः नन्दग्रामवृषभानुपुरप्रभृतयः ताः विलोक्य दृष्ट्वा पूर्वक्रीड़ायाः कृष्णावतारे वृन्दावनलीलायाः स्मरणेन विवशः अधीरः सन् भावपुञ्जैः भावराशिसमुद्भवैर्मुमोह मोहं प्राप । मानवलमवलम्बितवतो भगवतोऽपि पूर्वभावस्मरणजनितमोहः समुचित एव अतएव ज्ञानितया निखिलभुवनैकपतेरपि श्रीरामचन्द्रस्य सीतापरित्यागानन्तरं पुनरपि पञ्चवटी-दर्शनेन शोकमोहादिप्रादुर्भावः साधूक्तो महाकवि भवभूतिना अस्मिन्नेव लतागृहे त्वमभवस्तन्मार्गदत्तेक्षणः, सा हंसैः कृतकौतुकाचिरमभूद्गोदावरी-सैकते । आयान्त्या परिदुर्म्मनायितमिव त्वां वीक्ष्य बद्धस्तया, कातर्य्यादर-विन्दकुड्मलनिभो मुग्धः प्रणामाञ्जलिः । इत्यादिवचनजातेन तस्मात् हेतोः । भद्रः बलभद्रः व्रजविपिनतः व्रजवनात् यं गौरचन्द्रं चालयामास-स्थानमन्यत् निनाय, तं शोकातिकातरं समीक्ष्यान्यत्र प्रेरितवानित्यर्थः । तं निजजनवशं भक्तजनायत्तं दीनमूर्त्तिं गौराङ्गं स्मरामि । वृत्तं पूर्व्ववत् ॥ ५५ ॥

भावावेशं पथिपरमहोवीक्ष्य तं भाग्यवन्तो
म्लेच्छाः केचिच्छुभमतिबलाल्लेभिरे यत्प्रसादं।
भक्तास्ते च प्रणयवशगा यत्प्रसादाद्बभूवु
स्तं गौराङ्गं जनिमलहरं शुद्धमूर्त्तिं स्मरामि॥ ५६॥
पुण्ये गङ्गातपनतनया सङ्गमे तीर्थवर्य्ये
रूपं विद्यां पररसमयीं शिक्षयामास यो वै।
प्रेमाणं गोकुलपतिगतं वल्लभाख्यं बुधञ्च
तं गौराङ्गं रसगुरुमणिं शास्त्रमूर्त्तिं स्मरामि॥ ५७॥
काशीक्षेत्रे रसविरहितान् केवलाद्वैतपन्थान्
प्रेम्नाप्लाव्य स्वजनकृपया यस्तु रूपाग्रजाय।

---

भावावेशमिति। पथि तं परं उत्कृष्टं भावावेशं वीक्ष्य दृष्ट्वा केचित् भाग्यवन्तो म्लेच्छाः शुभमतिबलात् सुकृतिबलादित्यर्थः यस्य गौरचन्द्रस्य प्रसादं लेभिरे प्रापुः। अपिच ते म्लेच्छाः प्रणयवशगाः गौरप्रेमिकाः सन्तः यत्प्रसादात् भक्ता बभूवुः। तं जनिमलहरं जन्मपापविनाशिनं शुद्धमूर्त्तिं गौराङ्गं स्मरामि। वृत्तं पूर्ववत्॥ ५६॥

पुण्य इति। यः प्रभुः पुण्ये पवित्रे गङ्गा च तपनतनया यमुना च तयोः सङ्गमो यत्र तस्मिन् गङ्गायमुनासङ्गमे तीर्थवर्य्ये तीर्थश्रेष्ठे रूपं रूपगोस्वामिनं पररसमयीं परमरसात्मिकां विद्यां शिक्षयामास। अपिच वल्लभाख्यं वल्लभनामकं बुधं पण्डितञ्च गोकुलपतिगतं कृष्णसम्बन्धीयं प्रेमाणं प्रेमभक्तिं शिक्षयामास। तं रसानां गुरुः शिक्षकः स एव मणिस्तं शास्त्रमूर्त्तिं पण्डिताग्रगण्यतयेति भावः गौराङ्गं स्मरामि। वृत्तं पूर्ववत्॥ ५७॥

काशीक्षेत्र इति। यः प्रभुः काशीक्षेत्रे प्रयागात् प्रत्यावृत्येति शेषः।

विष्णोर्भक्तिस्मृतिविरचने साधुशक्तिं व्यतारीत्
वन्दे गौरं भजनविषये साधकानां गुरुं तं ॥ ५८ ॥
धिक् गौराङ्गप्रणतिरहितां शुष्कतर्कादिदग्धा-
नित्यारभ्यप्रचुरवचनं शाङ्कराणां बभूव ।
न्यासीशानां सदसि महतां यस्य पूजा तदाभूत्
गौराङ्गं तं स्वसुखमथनानन्दमूर्त्तिं स्मरामि ॥ ५९ ॥
प्राप्यचैत्रं पुनरपिहरिर्भक्तवर्गं तुतोष
रामानन्दप्रमुखसुजनान् सार्व्वभौमादिकान् यः ।

---

रसविरहितान् हरिप्रेमानभिज्ञान् केवलाद्वैतपद्मान् केवलाद्वैतवादिनः प्रबोधानन्दसरस्वतीप्रभृति सन्न्यासिनः स्वजनानां तपनमिश्र चन्द्रशेखरप्रमुख-भक्तानां कृपया अनुरोधेनेत्यर्थः प्रेम्ना हरिप्रेम्ना आप्लाव्य आर्द्रीकृत्य रूपाग्रजाय सनातनगोस्वामिने विष्णोः भक्तिस्मृतिविरचने श्रीहरिभक्तिविलासग्रन्थरच-नायां साधुशक्तिं उत्कृष्टशक्तिं व्यतारीत् प्रददौ ( विपूर्व्वकात् तॄधातोर्लुङ् ) तं भजनविषये साधकानां गुरुं गौरं वन्दे अभिवादये । वृत्तं पूर्व्ववत् ॥५८॥

धिगिति । गौराङ्गप्रणतिरहितान् गौराङ्गप्रणामपराङ्मुखान् शुष्क-तर्कादिदग्धान् नीरस-तर्काद्यनुसन्धानेन सन्तप्तान् धिक् इति आरभ्य शाङ्क-राणां शाङ्करसन्न्यासिनां प्रचुरवचनं बभूव । श्रीमद्गौराङ्गदेवस्य सम्यक् प्रचारे शाङ्कर सन्न्यासिनस्तद्भक्ताः सन्तः गौरविमुखानां निन्दादिकं चक्रुरित्यर्थः । तथा महतां न्यासीशानां सन्न्यासिश्रेष्ठानां सदसि सभायां यस्य गौरचन्द्रस्य तदा पूजाऽभूत् । तं स्वसुखस्य ब्रह्मानन्दस्य मथनेन परमानन्दमूर्त्तिं गौराङ्गं स्मरामि । वृत्तं पूर्व्ववत् ॥ ५९ ॥

प्राप्यचैत्रमिति । यः प्रभुः हरिः पुनरपि चैत्रं प्राप्य काशीतः पुरुषो-

प्रेमालापैर्हरिरसपरैर्यापयामास वर्षान्
तं गौराङ्गं हरिरसकथास्वादपूर्णं स्मरामि ॥ ६० ॥
यत्पादाब्जं विधिशिवनुतं वीचितुं ते महान्तो
वर्षे वर्षे रथपरिगतौ गौड़देशात् समेत्य।
प्रीतिं लब्ध्वा मनसि महतीं मोद्रदेशात् समीयु
र्गौड़ीयानां परमसुहृदं तं यतीन्द्रं स्मरामि ॥ ६१ ॥
निर्व्विण्णानां विपुलपतनं स्त्रीषु सम्भाषणं यत्
तत्तद्दोषात् स्वमतचरकारक्षणार्थं य ईशः।
दोषात् चुद्रादपि लघुहरिं वर्ज्जयित्वा मुमोद
तं गौराङ्गं विमलचरितं साधुमूर्त्तिं स्मरामि ॥ ६२ ॥

---

त्वमत्रैवमागत्य रामानन्दप्रमुख सुजनान् सार्व्वभौमादिकान् भक्तवर्गान् हरिरसपरैः भगवत्‌रसमयैः प्रेमालापैः तुतोष। अपि च वर्षान् यापयामास। तं हरिरसकथास्वादेन पूर्णं गौराङ्गं स्मरामि। वृत्तं पूर्व्ववत् ॥ ६० ॥

यत्पादाब्जमिति। ते प्रसिद्धाः महान्तः अद्वैतादयः विधिशिवनुतं ब्रह्मशिवस्तुतं यस्य प्रभोः पादाब्जं पादपद्मं वीचितुं द्रष्टुं वर्षे वर्षे प्रतिवर्षं रथपरिगतौ रथयात्रायां गौड़देशात् समेत्य आगत्य मनसि महतीं प्रीतिं लब्ध्वा ओद्रदेशात् समीयुः जग्मुः गौड़देशमिति शेषः। तं गौड़ीयानां परमसुहृदं परममित्रं यतीन्द्रं स्मरामि। वृत्तं पूर्व्ववत् ॥ ६१ ॥

निर्व्विण्णानामिति। निर्व्विण्णानां त्यक्तगृहाणां वैष्णवानां स्त्रीषु विषये यत् सम्भाषणं तत् विपुलपतनं अत्यन्तपतनहेतुरित्यर्थः। अतएव य ईशः प्रभुः तद्दोषात् स्त्रीसम्भाषणदोषात् स्वमतं चरन्ति अनुतिष्ठन्ति ये ते स्वमतचराः स्वमतावलम्बिनः ततः स्वार्थे कन् तेषां आरक्षणार्थं संरक्षार्थं चुद्रादपि

दैवाद्धीनान्वयजनिवतां तत्त्वबुद्धिप्रभावा
दाचार्य्यत्वं भवति यदिदं तत्त्वमेकं सुगूढ़ं।
प्रद्युम्नाय प्रचुरकृपया ज्ञापयामास यस्तत्
तं गौराङ्गं गुणमधुकरं जाड्यशून्यं स्मरामि॥ ६३॥
वात्सल्येन स्वभजनवशात् दासगोस्वामिनं य
स्तत्त्वज्ञानं भजनविषये शिक्षयामास साक्षात्।
सिन्धोस्तीरे चरमसमये स्थापयामास दासं
तं गौराङ्गं स्वचरणजुषां बन्धुमूर्त्तिं स्मरामि॥ ६४॥

दोषात् स्त्रीसम्भाषणरूपात् लघुहरिं हरिदासनामकं भक्तविशेषं वर्जयित्वा विहाय मुमोद हर्षं प्राप। तं विमलचरितं निर्म्मलचरित्रं साधुमूर्त्तिं गौराङ्गं स्मरामि। वृत्तं पूर्व्ववत्॥ ६२॥

दैवादिति। यः प्रभुः दैवात् प्राक्तनरूपात् हीनान्वयजनिवतां नीचकुल-सम्भूतानां तत्त्वबुद्धिप्रभावात् साधुसङ्गादिजनिततत्त्वज्ञानोदयात् यत् आचार्य्यत्वं भवति इदमेकं सुगूढ़ं तत्त्वं प्रचुरकृपया अतिकरुणया प्रद्युम्नाय प्रद्युम्नमिश्राय ज्ञापयामास व्यजिज्ञपत्। तं गुणस्य मधुकरं गुणग्राहिणं जाड्यशून्यं कर्म्मजड़ताशून्यं गौराङ्गं स्मरामि। अत्र भगवति मधुकरत्वारोपात् गुणे मधुत्वारोप तात्पर्य्यमायातं। वृत्तं पूर्व्ववत्॥ ६३॥

वात्सल्येनेति। यः प्रभुः स्वस्य निजस्य यत् भजनं रघुनाथदासगोस्वामि-कर्त्तृकभजनं तस्य वशात् वात्सल्येन दासगोस्वामिनं श्रीरघुनाथदास गोस्वामिनं भजनविषये तत्त्वज्ञानं साक्षात् शिक्षयामास उपदिदेश। तथा चरमसमये देहत्यागकाले सिन्धोः समुद्रस्य तीरे दासं हरिदासं स्थापयामास। तं स्वस्य चरणौ जुषते सेवन्ते इति स्वचरणजुषः स्वपादसेवकाः तेषां बन्धुमूर्त्तिं गौराङ्गं स्मरामि। वृत्तं पूर्व्ववत्॥ ६४॥

पुरीं रामाख्यं यो गुरुजनकथा-निन्दनपरं
सदोपेत्य भ्रान्तं कलिकलुषकूपेगतमिह।
अमोघं स्वीचक्रे हरिजनकृपालेशबलतः
शचीसूनुः शश्वत्स्मरणपदवीं गच्छतु स मे॥ ६५॥
सनातनं कण्डुरसप्रपीड़ितं
स्पर्शेन शुद्धं कृपया चकार यः।
स्वनाशबुद्धिं परिशोधयन्नहो
स्मरामि गौरं नवखण्डनागरं॥ ६६॥

पुरीमिति। यः प्रभुः कलेः कलियुगस्य यत् कलुषं पापं तदेव कूपः तस्मिन् गतं पतितं तथा गुरुजनकथानिन्दनपरं गुरुनिन्दकमित्यर्थः। भ्रान्तं मूढ़ं रामाख्यं पुरीं रामचन्द्रपुरीं सदा उपेत्य परित्यज्य। इह भवे। हरिजनानां भगवद्भक्तानां कृपालेशबलतः कृपाकणबलात् (पञ्चम्यास्तस्) अमोघं सार्व्वभौमजामातरं अमोघभट्टाचार्य्यं स्वीचक्रे अङ्गीचकार स्वजनं कृतवानित्यर्थः। स शचीसूनुः श्रीगौराङ्गः मे मम शश्वत् नित्यं स्मरणपदवीं स्मृतिपथं गच्छतु आरोहतु। स्मरणविषयीभवत्वित्यर्थः। वृत्तं शिखरिणीरसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणीति लक्षणात्॥ ६५॥

सनातनमिति। यः श्रीगौराङ्गः कण्डुरसप्रपीड़ितं सनातनं सनातनगोस्वामिनं कृपया स्पर्शेन शुद्धं अरोगं चकार। कीदृशः स्वनाशबुद्धिं जगन्नाथरथचक्रे स्वदेहं त्यक्ष्यामि इति निजनाशकबुद्धिं परिशोधयन् परित्याजयन्। तं नवखण्डानां नवद्वीपानां नागरं ईश्वरं गौरं स्मरामि। उपजातिवृत्तं॥ ६६॥

**गोपीनाथं नरपतिबलाद्यो ररक्षात्मतन्त्रो**
**रामानन्दानुजनिजजनं शिक्षयन् धर्म्मतत्त्वं।**
**पापैर्लब्धं धनमिह सदा त्याज्यमेव स्वधर्म्मात्**
**तं गौराङ्गं स्वजनशिवदं भद्रमूर्त्तिं स्मरामि॥ ६७॥**

**उपायनं राघवतः समादृतं**
**पुनः पुनः प्राप्तमपि स्वदेशतः।**
**स्वभक्ततो येन परात्परात्मना**
**तमेव गौरं सततं स्मराम्यहं॥ ६८॥**

---

गोपीनाथमिति। इह संसारे पापैः पापकर्म्मभिर्लब्धं प्राप्तं धनं सदा स्वधर्म्मात् निजधर्म्मानुसारेण त्याज्यं एव इति धर्म्मतत्त्वं। रामानन्दस्य अनुजा भ्रातरः अतएव निजजनाः आत्मीयजनास्तान् शिक्षयन् उपदिशन् यः आत्मतन्त्रः स्वतन्त्रः प्रभुः नरपतिबलात् राजबलात् गोपीनाथं तदाख्य भक्तं ररक्ष। कदाचित्, राजा "गोपीनाथं राजधनापव्ययापराधेन दण्डार्हं निश्चित्य तस्मै दण्डं दातुमुद्युक्तवान्, भवानन्दप्रभृतयस्तु तद्रक्षार्थं प्रभुं प्रार्थयामासुः, अथ पापलब्धधनं धार्म्मिकैर्न ग्राह्यं परन्तु सततमेव त्याज्यमिति धर्म्मतत्त्वं। अहमत्र न तिष्ठामीति कथितवति भगवति, राजा तदाकर्ण्य गोपीनाथं दण्डात् रक्षितवानिति सरलार्थः। तं स्वजनानां भक्तजनानां शिवदं कल्याणप्रदं भद्रमूर्त्तिं गौराङ्गं स्मरामि। मन्दाक्रान्ता वृत्तं॥ ६७॥

उपायनमिति। परात्परात्मना येन प्रभुणा स्वदेशतः वङ्गदेशात् स्वभक्ततो राघवतः निजभक्त राघवपण्डितात् पुनः पुनः प्राप्तं वारंवारं लब्धमपि उपायनं भक्ष्यरूपमुपढौकनं समादृतं आदरात् स्वीकृतं। तमेव गौरं अहं सततं सर्व्वदा स्मरामि। वंशस्थविलं वृत्तं, वदन्ति वंशस्थविलं जतौ जरौ इति लक्षणात्॥ ६८॥

तैलं नाङ्गीकृतं येन सन्न्यासधर्म्मरक्षिणा ।
जगदानन्ददत्तञ्च स्मरामि तं महाप्रभुम् ॥ ६९ ॥
जगन्नाथागारे गरुड़सदने स्तम्भनिकटे
ददर्श श्रीमूर्त्तिं प्रणयविवशा कापि जरती ।
समारुह्य स्कन्धं यदमलहरेस्तुष्टमनसः
शचीसूनुः शश्वत् स्मरणपदवीं गच्छतु स मे ॥७०॥
पुरीदेवे भक्तिं गुरुचरणयोग्यां सुमधुरां
दयां गोविन्दाख्ये विशदपरिचर्य्याश्रितजने ।

तैलमिति। येन प्रभुणा सन्न्यासधर्म्मरक्षिणा सता जगदानन्ददत्तं जगदानन्दनामकपण्डितदत्तं तैलं चन्दनादितैलं न अङ्गीकृतं स्वीकृतं तं महाप्रभुं अहं स्मरामि ॥ ६९ ॥

जगन्नाथेति। जगन्नाथस्य श्रीजगन्नाथदेवस्य आगारे मन्दिरे गरुड़सदने गरुड़गृहे स्तम्भनिकटे स्तम्भसमीपे कापि अज्ञातपरिचया जरती वृद्धा स्त्री तुष्टमनसः हृष्टचित्तस्य यस्य अमलस्य हरेः श्रीगौराङ्गचन्द्रस्य स्कन्धं स्कन्धदेशं समारुह्य प्रणयेन जगन्नाथदर्शनरागौत्कण्ठ्येन विवशा विलुप्तवाह्यज्ञाना श्रीमूर्त्तिं श्रीजगन्नाथं ददर्श निरीक्षाञ्चक्रे। कदाचित् श्रीजगन्नाथदर्शनाभिलाषौत्कण्ठ्येन लुप्तज्ञाना काचित् वृद्धा श्रीगौराङ्गचन्द्र-स्कन्धमारुह्य श्रीमूर्त्तिमवलोकयामास, तद्दृष्ट्वा गोविन्दो नाम कश्चित् भक्तः तां निषिषेध, श्रीमन्महाप्रभुस्तु सन्तुष्टमनाः मामेवं कथयेति गोविन्दमेव निवारयामासेति तात्पर्य्यं। स शचीसूनुः मे मम शश्वत् नित्यं स्मरणपदवीं स्मृतिपथं गच्छतु प्राप्नोतु। शिखरिणीवृत्तं ॥ ७० ॥

स्वरूप इति। यः प्रभुः पुरीदेवे परमानन्दपुरीं प्रतीत्यर्थं गुरुचरणयोग्यां

स्वरूपे यो प्रीतिं मधुररसरूपां ह्यकुरुत
शचीसूनुः शश्वत् स्मरणपदवीं गच्छतु स मे ॥ ७१ ॥
दधानः कौपीनं वसनमरुणं शोभनमयं
सुवर्णाद्रेः शोभां सकलसुशरीरे दधदपि।
जपन् राधाकृष्णं गलदुदकधाराक्षियुगलः
शचीसूनुः शश्वत् स्मरणपदवीं गच्छतु स मे ॥ ७२ ॥
मुदागायन्नुच्चैर्मधुरहरिनामावलिमसौ
नटन् मन्दं मन्दं नगरपथगामी सहजनैः।
वदन् काका रेरे वदहरिहरीत्यक्षरयुगं
शचीसूनुः शश्वत् स्मरणपदवीं गच्छतु स मे ॥ ७३ ॥

---

अतएव सुमधुरां भक्तिं, तथा विशदा निर्म्मला या परिचर्य्या सेवा तामाश्रितः (इयं आश्रितार्थैः स इति द्वितीया समासः) यो जनस्तस्मिन् गोविन्दाख्ये भक्ते दयां, तथा स्वरूपे तन्नामके प्रियजने मधुररसरूपां प्रीतिं अकुरुत चकार। स शचीसूनुः मे मम शश्वत् स्मरणपदवीं स्मृतिपथं गच्छतु प्राप्नोतु। वृत्तं पूर्व्ववत् ॥ ७१ ॥

दधान इति। कौपीनं एवं तदुपरि। अरुणं शोभनमयं वसनं दधानः धारयन् सकल सुशरीरे सुवर्णाद्रेः काञ्चनपर्व्वतस्य शोभां दधत् धारयन्, गलन्ती पतन्ती उदकधारा आनन्दाश्रुप्रवाहो यस्मात् तादृशं अक्षियुगलं यस्य तादृशः सन् राधाकृष्णं राधया सह कृष्णं सहशब्दस्य पृथक्साहित्यबोधनात् राधाञ्च कृष्णञ्चेत्यर्थः जपन् स शचीसूनुः मे मम शश्वत् स्मरणपदवीं स्मृतिपथं गच्छतु प्राप्नोतु। वृत्तं पूर्व्ववत् ॥ ७२ ॥

मुदेति। जनैः भक्तजनैः सह नगरपथगामी सन् मुदा हर्षेण मधुर-

रहस्यं शास्त्राणां यदपरिचितं पूर्व्वविदुषाम्
श्रुतेर्गूढ़ं तत्त्वं दशपरिमितं प्रेमफलितं।
दयालुस्तद्योऽसौ प्रभुरतिकृपाभिः समवदत्
शचीसूनुः शश्वत् स्मरणपदवीं गच्छतु स मे॥ ७४॥

आम्नायः प्राह तत्त्वं हरिमिह
परमं सर्व्वशक्तिं रसाब्धिं
तद्भिन्नांशांश्च जीवान् प्रकृति-
कवलितान् तद्विमुक्तांश्च भावात्।

---

हरिनामावलिं उच्चैः गायन् तथा मन्दं मन्दं नटन् नृत्यन् तथा काक्वा काकुस्वरेण रे रे नगरवासिन् इति शेषः। हरिहरीति अक्षरयुगं वद इति वदन् असौ स शचीसूनुः श्रीगौराङ्गः मे मम शश्वत् सदा स्मरणपदवीं स्मृति-पथं गच्छतु आरोहतु। वृत्तं पूर्व्ववत्॥ ७३॥

रहस्यमिति। दयालुः योऽसौ प्रभुः अति-कृपाभिः अति-करुणाभिः पूर्व्वविदुषां पूर्व्वपण्डितानां यत् शास्त्राणां रहस्यं अपरिचितं अप्रकाशित-तरेति भावः। तत् दशपरिमितं दशपरिमाणं प्रेमफलितं प्रेमफलयुक्तं श्रुतेर्गूढ़ं गुप्तं तत्त्वं समवदत्। जीवान् शिक्षयामासेत्यर्थः। स शचीसूनुः शश्वत् सदा मे मम स्मरणपदवीं स्मृतिपथं गच्छतु प्राप्नोतु। वृत्तं पूर्व्ववत्॥७४॥

अधुना समासेन श्रीगौरचन्द्रोपदिष्टं तत्त्वं वदति आम्नाय प्राह तत्त्व-मिति। तं गौरचन्द्रं भजे। यः आम्नायः प्राह तत्त्वमिति वाक्येन आम्नायस्य प्रमाणत्वं एवञ्च तदुदितानि नवविधानि प्रमेयाणि उपदिशति। प्रमेयाणि यथा। प्रथमं हरिरेवैक तत्त्वं द्वितीयं स हरिः सर्व्वशक्तिविशिष्टः। तृतीयं स हरिर्निखिल रस-समुद्रः। चतुर्थं जीवास्तु हरेर्विभिन्नांशकाः। पञ्चमं

भेदाभेदप्रकाशं सकलमपि
हरेः साधनं शुद्धभक्तिं
साध्यं यत्प्रीतिमेवेत्युपदिशति
हरौ गौरचन्द्रं भजे तं ॥ ७५ ॥
स्वतः सिद्धो वेदो हरिदयितवेधः प्रभृतितः
प्रमाणं सत्प्राप्तं प्रमितिविषयान् तान्नवविधान्।

---

जीवानां केचन प्रकृतिकवलिताः। षष्ठं जीवानां केचन प्रकृतिविमुक्ताः। सप्तमं चराचरं विश्वन्तु हरेरचिन्त्य भेदाभेदप्रकाशमात्रं। अष्टमं शुद्ध भक्तिरेव बद्धजीवस्य प्रयोजनसाधनं। नवमञ्च भगवत् प्रीतिरेव प्रयोजनरूपं साध्यतत्त्वं। श्लोकेऽस्मिन् श्रीकृष्णचैतन्योपदिष्टं सम्बन्धाभिधेयप्रयोजनात्मकं तत्त्वं सूचितं ॥ ७५ ॥

अथ तदप्राकृतदशमूलं तत्त्वं विशिनष्टि दशश्लोकैः स्वतःसिद्ध इति। अस्य महतो भूतस्य निश्वसितमेतत् ऋगित्यादि वचनेन वेद एव स्वतःसिद्धप्रमाणं। तत्र ब्रह्मा देवानां प्रथमः सम्बभूवेत्यादि मण्डुकवाक्यानुसारेण भगवत् प्रियानुचर ब्रह्मप्रभृतितः यानि वेदवाक्यानि शिष्ट सम्प्रदाये प्राप्तानि तानि एव वेदपदवाच्यानि, नान्यानि कल्पितवचनानि। तानि स्वतःसिद्ध वेदवचनानि प्रत्यक्षादि प्रमाणसहकारेण नः अस्माकं सम्बन्धे तानि नवविधानि प्रमेयाणि साधयन्ति। तथाच श्रीजीवविरचिततत्त्वसन्दर्भः। तत्र पुरुषस्य भ्रमादिदोषचतुष्टयदुष्टत्वात् सुतरामचिन्त्यालौकिकवस्तुस्पर्शायोग्यत्वाच्च तत्प्रत्यक्षादीन्यपि सदोषाणि ततस्तानि न प्रमाणानीत्यनादि सिद्धपुरुष परम्परासु सर्व्वलौकिकालौकिकज्ञाननिदानत्वादप्राकृतवचनलक्षणो वेद एवास्माकं सर्व्वातीत

तथा प्रत्यक्षादिप्रमितिसहितं साधयति नः
न युक्तिस्तर्काख्या प्रविशति तथा शक्तिरहिता ॥७६॥
हरिस्त्वेकं तत्त्वं विधिशिवसुरेशप्रणमितः
यदेवेदं ब्रह्मोपनिषदुदितं तत्तनुमहः।

सर्व्वाश्रय सर्व्वाचिन्त्याश्चर्य्य स्वभावं वस्तुविविदिषतां प्रमाणं। तच्चानुमतं तर्काप्रतिष्ठानादित्यादौ। अचिन्त्याः खलु ये भावा न तांस्तर्केण योजयेदित्यादौ। शास्त्रयोनित्वादित्यादौ। श्रुतेश्च शब्दमूलत्वादित्यादौ। ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्व्वणं चतुर्थमितिहासं पुराणं पञ्चमं वेदानां वेदमित्यादि। तदेवमितिहास पुराणयोर्वेदत्वं सिद्धं। ब्रह्मसूत्र-भाष्यरूपस्य सर्व्ववेदान्तसारभूतस्य मूढ़जनानादृतस्य श्रीमद्भागवतस्य तु सर्व्व-पुराणश्रेष्ठत्वं प्रतिपादितं तत्रैव॥ अतः श्रीकृष्णचैतन्यशिक्षया स्वतःसिद्ध-वेदवाक्यानि तदर्थनिर्णायकपुराणेतिहासवचनानि तथा वेदानुगतप्रत्यक्षादि-प्राप्तज्ञानमपि परमार्थनिर्णये प्रमाणमिति स्पष्टीकृतं। वेदविरुद्धतर्कस्तु अचिन्त्य विषये न योग्यः अचिन्त्याः खलु ये भावा न तांस्तर्केन योजयेत्। प्रकृतिभ्यः परं यच्च तदचिन्त्यस्य लक्षणं। स्वल्पापि रुचिरेव स्यात् भक्तितत्त्वावबोधिका। युक्तिस्तु केवलानैव यदस्या अप्रतिष्ठता। यत्नेनापादितोऽप्यर्थः कुशलैरनु-मातृभिः। अभियुक्ततरैरन्यैरन्यथैवोपपद्यत इत्यादि शास्त्रवचनात्॥ ७६॥

स्वतःसिद्धो वेद इति श्लोकेन प्रमाणरूपं प्रथमतत्त्वं प्रदर्शयन् नवविधानि प्रमेयाणि विशदयति नवश्लोकैः हरिस्त्वेकमिति। तत्र हरिमिह परमं तत्त्व-मादौ दर्शयति। विधि-शिव-सुरेश-प्रणमितो हरिरेव एकं तत्त्वं। स तु नवजलदकान्तिश्चिदुदयः राधाकान्तः श्रीकृष्णचन्द्र एव। उपनिषदुदितं यद्ब्रह्म इदमेव तस्य राधाकान्तस्य तनुमहः अङ्गकान्तिः। यस्य भासा सर्व्वमिदं

परात्मा तस्यांशो जगदनुगतो विश्वजनकः
सवै राधाकान्तो नवजलदकान्तिश्चिदुदयः॥ ७७॥

विभाति इति वचनेन, सर्व्वं खल्विदं ब्रह्म इत्यादि वचनेन च तस्य भगवतो भाषा इदं सर्व्वम् ब्रह्मलक्षणं वस्तु विभातीति सिद्धं भवति। यस्तु जगदनुगत विश्वजनकः परमात्मा सोऽप्यस्य कृष्णस्य अंश एव। कृष्णस्तु भगवान् स्वयमिति सिद्धं। भगशब्दार्थस्तु ऐश्वर्य्यस्य समग्रस्य वीर्य्यस्य यशसः श्रियः। ज्ञानवैराग्ययोश्चैव षण्णां भग इतीङ्गनेति। अतएव श्रुतौ च। पूर्णमदः पूर्णमिदं पूर्णात् पूर्णमुदच्यते। पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥ श्रीकृष्णस्वरूपं तु सर्वाङ्ग तचमत्कारलीलाकल्लोलवारिधिः। अतुल्य मधुरप्रेममण्डितप्रियमण्डलः। त्रिजगन्मानसाकर्षी मुरली कलकूजितः। असमानोर्द्धरूप श्री विस्मापित चराचर इत्यादि सिद्धान्तवाक्येन अप्राकृतस्वरूपस्य भगवतः सर्व्वोर्द्धसीमा परिचयः। तथाच भगवत् सन्दर्भे। खलु स्वरूपभूतभेदविशेषमननुसन्धायायत्तस्वरूपमात्रं तदानीं अवशिष्टं भवति तदेव ब्रह्माख्यं। तच्च विशेष्य मात्रं। स्वरूपशक्तिविशिष्टेन वैकुण्ठस्थेन श्रीभगवता पृथगिव तत्रानुभूयते। तदेव निर्व्विशेषत्वेन स्पर्शरूपादिरहितस्यापि तस्य भगवत्प्रभारूपमुत्प्रेक्ष्य तदभिन्नत्वेन ब्रह्मत्वं व्यपदिष्टं। ततः स्पर्शरूपादिमाधुरीधारितया सविशेषस्य साक्षात् भगवदङ्ग ज्योतिषः सुतरामेव तत्सिध्यति। तथाच परमात्मसन्दर्भे। यद्यपि परमात्मत्वं वैकुण्ठेऽपि प्रभोरपि। तदपि च भगवत्ताङ्गं तत्स्यादित्थं जगद्गतं वाच्यं। सर्व्वान्तर्यामिपुरुष एव ब्रह्मेति परमात्मेत्यादौ परमात्मत्वेन निर्द्दिष्टः। अस्य परमात्मनो मायोपाधितया पुरुषत्वं तूपचरितमेव। श्रुतयोप्येनं शुद्धत्वेनैव वर्णयन्ति। एको देवः सर्व्वभूतेषु गूढ़ः सर्व्वव्यापी सर्व्वभूतान्तरात्मा। कर्म्माध्यक्षः सर्व्वभूताधिवासः साक्षीचेताः केवलो निर्गुणश्च। अथास्याविर्भावे योग्यता प्राग्वत् भक्ति-

रेवज्ञेया ( ज्ञानमिश्राभक्तिः ) आविर्भावस्तु त्रिधा। विष्णोस्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः। प्रथमः महतः स्रष्टृ द्वितीयं त्वण्डसंस्थितं। तृतीयं सर्व्वभूतस्थं तानि ज्ञात्वा विमुच्यते। तत्र प्रथमो यथाग्नेः क्षुद्रा विस्फुलिङ्गा-व्युच्चरन्ति स ऐक्षतेत्याद्युक्तेः। अयमेव सङ्कर्षण इति महाविष्णुरिति च। अथ द्वितीयः पुरुषस्तत् सृष्टास्तदेवानुप्राविशदित्याद्युक्तेः समष्टि जीवान्तर्यामी तेषां ब्रह्माण्डात्मकानां बहुभेदाद्बहुभेदः। तृतीयोऽपि पुरुषो द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते। एकस्तयोः खादति पिप्पलान्नमन्यो निरश्नन्नभिचाकशीतीत्याद्युक्तोव्यष्ट्यन्तर्यामी तेषां भेदाद्बहुभेदा इति॥ कोऽसौ हरिरिति प्रश्नोत्तरे श्रुतिश्च। स ब्रह्मणा सृजति। स रुद्रेण विलापयति सोऽनुत्पत्तिरलय एव हरिः परः परमानन्द इति। एकं सन्तं बहुधा दृश्य-मानमिति च। श्यामाच्छबलं प्रपद्ये शवलाच्छ्यामं प्रपद्ये इति छान्दोग्य-वचनेन श्रीराधावल्लभस्य मुक्तोपास्यत्वमपि श्रूयते इति। अयमत्र निष्कर्षः। अद्वयज्ञानात्मकं तत्त्वं विविदिषतां ज्ञानयोगेन अतन्निरसनप्रक्रियया निर्व्विशेषब्रह्म एव प्रथमा प्रतीतिः। सूक्ष्मस्थूलानुसन्धानरूपाष्टाङ्ग-योगेन समाधिसाधनप्रक्रियया अवतारनिदानात्मक परमात्मा एव द्वितीया प्रतीतिः। विशुद्धभक्तियोगेन तदनुग्रहसाधनप्रक्रियया भगवान् एव तृतीया प्रतीतिः। स भगवान् सान्द्रसच्चिदानन्दैकरूपः स्वरूपभूताचिन्त्य-विचित्रानन्तशक्तियुक्तः। धर्म्मत्व एव धर्म्मित्वं निर्भेद एव नानाभेदवत्त्वं। निर्व्विशेष एव सविशेषत्वं परमैश्वर्य्य एव परममाधुर्य्यवत्वं अरूपित्व एव सरूपित्वं अप्राकृतत्व एव प्रपञ्च विजयित्वं व्यापकत्व एव मध्यमत्वं सत्य-सेवेत्यादि परस्परविरुद्धानन्त गुणनिधिः। स्थूलसूक्ष्म विलक्षणस्वप्रकाशाखण्ड-स्वस्वरूपभूतब्रह्मपरमात्माश्रयात्मकरूप नित्य श्रीविग्रहविशिष्टः। स्वानुरूप-स्वरूपशक्त्याविर्भावलक्षण श्रीसुशोभितवामांशः। स्वरूपशक्तिविलासलक्षणाद्भुत-गुणलीलादिमयः परमपुरुषः। मायिकब्रह्माण्डातीतविशुद्धचिन्मयनिजधाम-

**पराख्यायाः शक्तेरपृथगपि स स्वे महिमनि**
**स्थितो जीवाख्यांस्वामचिदभिहितां तां त्रिपदिकां ।**

सुविराजमानोऽपि लीलया स्वरूपशक्तिबलेन वैकुण्ठद्वैयप्रतिच्छविरूपप्रापञ्चिक-जगति स्वेन धाम्ना स्वपरिकरेण भक्तानुग्रहतत्परः सन्नाविर्भवति क्रीड़ति च। कृष्णस्तु भगवान् स्वयं, कृष्ण परमपुरुष इत्यादिना कृष्णधाम, कृष्णरूप, कृष्ण-परिकर, कृष्णलीलादि सर्व्वं अचिन्त्य चिन्मयव्यापारविशेषः। चित्कणत्वात् तदीय जीवोऽपि तद्द्रष्टुं तल्लीला प्रवेष्टुं शक्तो भवति तदनुग्रहात्। कृष्ण-तत्त्वानभिज्ञास्तु प्राकृतबुद्ध्या तदनादृत्य जड़व्यतिरेकबुद्धिसंजातब्रह्मतत्त्वं, जड़प्रविष्टांशरूपपरमात्मतत्त्वं जड़शक्तितत्त्वादिकञ्च बहुमानयन् तत्तन्मत-वादादिषु परिभ्रमन्ति यावत् पूर्व्वसुकृतिबलेन आधुनिक सत्सङ्गबलेन च विशुद्धकृष्णभजनाधिकारं न लभन्ते ॥ ७७ ॥

श्रीहरेः सर्व्वशक्तित्वं दर्शयति पराख्याया इति। स भगवान् कृष्ण-चन्द्रः। स्वस्य पराख्यशक्तेरपृथगपि। शक्तिशक्तिमतोरभेद इति न्यायात् शक्तितो न पृथक्। स्वीय अभेद अखण्ड महिमनि स्थितोपि। तामेकां चिदचित् जीवक्रियाभेदेन त्रिपदिकां शक्तिं तत्तद्विषये स्वतन्त्रेच्छतया प्रेरणपरः स्वयं स्वेच्छामयः परमपुरुषः तत्तच्छक्ति विकारास्पृष्टः सन् विज-यते। शक्तिशक्तिमतोर्मध्ये कस्य प्राधान्यमिति संशयोऽत्र विद्यते जड़धियां। जड़बुद्धयस्तु शक्तेः प्राधान्यं स्थापयन्ति शक्तिं विना शक्तिमत् वस्तुनः प्रतीति-र्नास्तीति वादमात्रोद्भावनया। शक्तिस्तु धर्म्मविशेषः। शक्तिमत्तत्त्वस्येच्छां विना शक्तिक्रिया न सिध्यति। स ऐक्षत स इमान् असृजत इति श्रुतेः। मयाध्यक्षेण प्रकृतिः सूयते सचराचरमिति स्मृतेश्च। लोकेऽपि वस्तुशक्तिः सर्व्वत्रैव वर्त्तते। अविचालिता सा तु जड़वत् क्रियाहीना। चलक्रियायां मूलतश्चैतन्य वस्तु एव कारणं। शक्ते रिच्छाशक्तिरस्तीतिवचनं निरर्थक

स्वतन्त्रेच्छः शक्तिं सकलविषये प्रेरयति यो
विकाराद्यैः शून्यः परमपुरुषोऽसौ विजयते ॥ ७८ ॥

वागाड़म्बरमात्रं। इच्छा तु शक्तिवत् शक्तिमच्चैतन्यवस्तुनो धर्म्मान्तरमिति ज्ञेयं। अतश्चैतन्यात्मक कृष्णस्तु स्वतन्त्रेच्छइति वाक्यप्रयोगः सार्थकः। श्रुतौ परशक्तिर्वर्ण्यते। न तस्य कार्य्यं करणञ्च विद्यते न तत् समश्चाभ्यधिकश्च दृश्यते। परास्य शक्तिर्विविधैव श्रूयते स्वाभाविकीज्ञानबलक्रियाचेति। तत्रैव चित्पदिका वर्ण्यते। ते ध्यानयोगानुगता अपश्यन् देवात्मशक्तिं स्वगुणैर्निगूढ़ां। यः कारणानि निखिलानि तानि कालात्मयुक्तान्यधितिष्ठत्येक इति। तत्रच जीवपदिका वर्ण्यते। अजामेकां लोहितकृष्णशुक्लां वह्वीः प्रजाः सृजमानां स्वरूपां। अजोह्येको जुषमाणोनुशेते जहात्येनां भुक्त भोगामजोन्य इति। तत्र चाचित्पदिका वर्ण्यते। छन्दांसि यज्ञाः क्रतवो व्रतानि भूतं भव्यं यच्च वेदावदन्ति। यस्मान् मायी सृजते विश्वमेतत् तस्मिंश्चान्यो मायया सन्निरुद्ध इति। भगवत्सन्दर्भे। शक्तिश्च सा त्रिधा। अन्तरङ्गा तटस्था वहिरङ्गा च। तत्रान्तरङ्गया स्वरूप शक्त्याख्यया पूर्णेनैव स्वरूपेण वैकुण्ठादिस्वरूपवैभवरूपेण चावतिष्ठते। तटस्थया रश्मिस्थानीयचिदेकात्मशुद्धजीवरूपेण। वहिरङ्गया मायाख्यया प्रतिच्छविगतवर्णशावल्यस्थानीय तदीय वहिरङ्गवैभवजड़ात्मप्रधानरूपेण च। इति एकमात्रतत्त्वस्य चतुर्द्धात्वं। तदेवं सर्व्वाभिमिलिता चिदचिच्छक्तिर्भगवान्। स च भगवान् विकाराद्यैः शून्यः परमपुरुष एव, यथा भागवते। यस्मिन् विरुद्धगतयो ह्यनिशं पतन्ति विद्यादयोविविधशक्तय आनुपूर्व्व्या। तद्ब्रह्मविश्वभवमेकमनन्तमाद्यमानन्दमात्रमविकारमहं प्रपद्ये इति ॥ ७८ ॥

**सवै ह्लादिन्याश्च प्रणयविकृतेर्ह्लादनरतः
तथा सम्बिच्छक्तिप्रकटितरहोभाव रसितः।**

---

श्रीहरेः निखिलरसाधारत्वं विशदयति स वैह्लादिन्याश्च इति। सः श्रीकृष्णः स्वरूपशक्तेर्ह्लादिनीवृत्तेः प्रणयविकृतिकृत ह्लादनव्यापारे रतः। पुनः तत्शक्तेः सम्बित्वृत्तिप्रकटित प्रकाशितरहस्यानां भावेन रसितः। पुनश्च तत्शक्तेः सन्धिनीवृत्तिकृत तदुपयोगी चिद्धामनिचये रसाम्भोधौ रससमुद्रे मग्नो भूत्वा व्रजरसविलासी सन् विजयते। रसो वै सः। रसं ह्येवायं लब्ध्वानन्दी भवति। कोह्येवान्यात् कः प्राण्यात् यदेष आकाश आनन्दो न स्यात्। एष ह्येवानन्दयति इत्यादि श्रुतिषु तस्य ह्लादिनी शक्तिपरिचयः। प्रज्ञानं ब्रह्म, सत्यं ज्ञानमनन्तं ब्रह्म इत्यादि वेदवचनेषु तस्य सम्बित्शक्तिपरिचयः। दिव्ये पुरे ह्येष संव्योम्न्यात्मा प्रतिष्ठित इत्यादि वाक्येषु सन्धिनीशक्तिपरिचयो द्रष्टव्यः। भगवत्सन्दर्भे। अथैकमेव स्वरूपं शक्तित्वेन शक्तिमत्वेन च विराजति। यस्य शक्तेः स्वरूपभूतत्वं निरूपितं तच्छक्तिमत्त्वप्राधान्येन विराजमानं भगवत्संज्ञामाप्नोति। एकस्यैव तत्त्वस्य सत्वाच्चित्वादानन्दत्वात् शक्तिरप्येका त्रिधा भिद्यते। तदुक्तं श्रीविष्णुपुराणे "ह्लादिनी सन्धिनी सम्वित् त्वय्येका सर्व्वसंस्थितौ। ह्लादतापकरी मिश्रा त्वयि नो गुणवर्ज्जिते॥ तत्र ह्लादकरूपोऽपि भगवान् यया ह्लादते ह्लादयति च सा ह्लादिनी। तथा सत्तारूपोऽपि यया सत्तां दधाति धारयति च सा सन्धिनी। एवं ज्ञानरूपोऽपि यया जानाति ज्ञापयति च सा सम्बिदिति ज्ञेयं। तदेवं तस्यास्त्रयात्मकत्वे सिद्धे येन स्वप्रकाशता लक्षणेन तद्वृत्तिविशेषेण स्वरूपं वा स्वयं स्वरूप शक्ति र्वा विशिष्टं वाविर्भवति तद्विशुद्ध सत्वं। तच्चान्य निरपेक्षस्तत्प्रकाश इति ज्ञापनज्ञानवृत्तिकत्वात् सम्बिदेव। अस्य मायया स्पर्शाभावाद्विशुद्धसत्त्वं। तत्र चेदमेव सन्धिन्यंश-

**तथा श्रीसम्बिन्या कृतविशदतद्धामनिचये**
**रसाम्भोधौ मग्नौ व्रजरसविलासौ विजयते ॥ ७८ ॥**

प्रधानं चेदाधारशक्तिः। सम्बिदंशप्रधानमात्मविद्या। ह्लादिनी सारांश-प्रधानं गुह्यविद्या। युगपच्छक्तित्रयप्रधानं मूर्त्तिः। अत्राधारशक्त्या भगवद्धामप्रकाशते। अथ मूर्त्त्या परतत्त्वात्मकः श्रीविग्रहः प्रकाशते। एवम्भूतानन्त वृत्तिका या स्वरूपशक्तिः सा त्विह भगवद्धामांशवर्त्तिनी मूर्त्तिमती लक्ष्मीरेव। तत्त्वसन्दर्भे। ननु माया खलुशक्तिः। शक्तिश्च कार्य्यक्षमत्वं तच्च धर्म्मविशेषः। तस्य कथं लज्जादिकं। उच्यते। एवं सत्यपि तासां शक्तिनामधिष्ठातृदेव्यः श्रूयन्ते। यथा केनोपनिषदि महेन्द्रमाययोः सम्वादः। रसविचारः श्रीभक्तिरसामृतसिन्धौ। विभावैरनुभावैश्च सात्त्विकैर्व्यभिचारिभिः। स्वाद्यत्वं हृदिभक्तानामानीता श्रवणादिभिः। एषा कृष्णरतिः स्थायी भावो भक्ति रसो भवेत्। तत्र ज्ञेया विभावास्तु रत्यास्वादन हेतवः। ते द्विधालम्बना एके तथैवोद्दीपना परे॥ कृष्णश्च कृष्णभक्ताश्च बुधैरालम्बना मताः। रत्यादेर्विषयत्वेन तथाधारतयापि च। उद्दीपनास्तु ते प्रोक्ता भावमुद्दीपयन्तिये। ते तु श्रीकृष्णचन्द्रस्य गुणाश्चेष्टाः प्रसाधनं। अनुभावास्तु चित्तस्थ भावानामवबोधकाः। ते वहिर्विक्रियाप्रायाः प्रोक्ता उद्भास्वराख्यया। नृत्यं विलुठितं गीतं क्रोशनं तनुमोटनं। हुङ्कारो जृम्भनं श्वासभूमालोकानपेक्षिता। लालास्रावोऽट्टहासश्च घूर्णा हिक्का दयोऽपि च। कृष्णसम्बन्धिभिः साक्षात् किञ्चिद्वा व्यवधानतः। भावैश्चित्तमिहाक्रान्तं सत्त्वमित्युच्यते बुधैः। सत्त्वादस्मात् समुत्पन्ना ये भावास्ते तु सात्त्विकाः। चित्तं सत्त्वीभवत् प्राणे न्यस्यत्यात्मानमुद्भटं। प्राणस्तु विक्रियां गच्छन्देहं विक्षोभयत्यलं। तदा स्तम्भादयो भावा भक्तदेहे भवन्त्यमी॥ ते स्तम्भ स्वेद-रोमाञ्चाः स्वरभेदोऽथ वेपथुः। वैवर्ण्य मश्रु प्रलय इत्यष्टौ सात्त्विकाः

**स्फुलिङ्गा ऋद्धाग्नेरिव चिदणवो जीवनिचया**
**हरेः सूर्य्यस्यैवापृथगपितु तद्भेदविषयाः।**

स्मृताः। अथोच्यन्ते त्रयस्त्रिंशद्भावा ये व्यभिचारिणः। विशेषेणाभिमुख्येन चरन्ति स्थायिनं प्रति। वागङ्ग सत्वसूच्या ये ज्ञेयास्ते व्यभिचारिणः। सञ्चारयन्ति भावस्य गतिं सञ्चारिणोपि ते। उन्मज्जन्ति निमज्जन्ति स्थायिन्य मृतवारिधौ। उर्म्मिवद्वर्द्धयन्त्येनं यान्ति तद्रूपताञ्चते। निर्व्वेदोऽथ विषाद-दैन्यं ग्लानि श्रमौ च मदगर्व्वौ। शङ्कात्रासावेगाउन्मादापस्मृती तथा व्याधिः। मोहमृतिरालस्य जाड्यं व्रीड़ावहित्था च। स्मृतिरथ-वितर्क-चिन्तामति-धृतयो-हर्ष-उत्सुकत्वञ्च। औग्र्यामर्षासूयाश्चापल्यञ्चैव निद्रा च। सुप्तिर्बोध इती मे भावा व्यभिचारिणः समाख्याताः॥ अथ स्थायीभावः। अविरुद्धान् विरुद्धांश्च भावान् यो वशतां नयन्। सुराजेव विराजेत सस्थायीभाव उच्यते। स्थायीभावोऽत्र स प्रोक्तः श्रीकृष्णविषया रतिः। परमानन्द तादात्म्याद्रत्यादेरस्य वस्तुतः॥ रहस्य स्वप्रकाशत्वमखण्डत्वञ्च सिध्यति। तथाप्युज्ज्वल नीलमणौ। स्याद्दृढ़ेयं रतिः प्रेमृणा प्रोद्यन् स्नेहः क्रमादयं। स्यान्मानः प्रणयो रागोऽनुरागो भाव इत्यपि॥ बीजमिक्षुः स च रसः सगुड़ः खण्ड एव सः। स शर्करा सिता सा च सा यथा स्यात् सितोत्पला॥ एतेन रससमुद्रस्य कृष्णस्य रसलीला सङ्केतेन वर्णिता। रसो वैस इति श्रुत्युक्त्या कृष्ण एव परम रसः॥ स तु नित्यमखण्डत्वेपि रसरूपेण विचित्र लीला-परः। प्रकटाप्रकटभेदेन लीलापि द्विविधा। अप्रकटलीलायाः नित्यवर्त्त-मानत्वे न भूतभविष्यद्विभागः कालातीतत्वात्तस्याः। प्रकटलीलावर्णनं तु कृतिसाध्यं। तदपि अतलत्वादपारत्वादाप्तोऽसौ दुर्व्विगाहतां। स्पृष्टः परं तटस्थेन रसाब्धिर्मधुरो यथा। एतत् सर्व्वं भक्तिपूतचेतसावेदितव्यं न तु युक्तिविचारेण॥ ७९॥

भगवत्तत्वं समालोच्याधुना तद्विभिन्नांशरूपं जीवस्वरूपं लक्षयति।

**वशे माया यस्य प्रकृतिपतिरेवेश्वर इह**
**सजीवोमुक्तोऽपि प्रकृतिवश्योगयः स्वगुणतः॥ ८०॥**

स्फुलिङ्गा क्षुद्राग्नेरिति। सूर्य्यस्थानीयस्य हरेः किरणपरमाणव एव जीवसमूहाः। ते तु क्षुद्राग्नेः समुद्राग्नेः स्फुलिङ्गा इव। अखण्डत्वात्ते च हरेः सकाशात् नित्य पृथक्। तटस्थ शक्तित्वात्तेऽपि भगवत अपृथक् शक्ति शक्तिमतोरभेद इति न्यायात्। हरिरेव ईश्वरः प्रकृतिपतिः मायाधीशः। माया तु तस्य विधिकरीति हरेः प्रभुता। जीवस्तु स्वभावतः नित्य' बद्ध मुक्तावस्था भेदेऽपि मायावश्योग्यः इति जीवेश्वरयोः भेदो विचारितः। श्रुतयः। यथाग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवास्मादात्मनः सर्व्वाणि भूतानि व्युच्चरन्ति। तस्य वा एतस्य पुरुषस्य द्वे एव स्थाने भवत इदञ्च परलोकस्थानञ्च सन्ध्यं तृतीयं स्वं स्थानं। तस्मिन् सन्ध्ये स्थाने तिष्ठन्नेते उभे स्थाने पश्यतीदञ्च परलोकस्थानञ्च। तद्यथा महामत्स उभे कूलेऽनुसञ्चरति पूर्व्वञ्च परञ्चैव मेवायं पुरुष एतावुभावन्तावनुसञ्चरति स्वप्नान्तञ्च बुद्धान्तञ्च। श्रीगीतोपनिषद्वाक्यानि। भूमिरापोऽनलो वायुः खं मनोबुद्धिरेव च। अहङ्कार इतीयं मे भिन्ना प्रकृतिरष्टधा। अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे परां। जीवभूतां महाबाहो ययेदं धार्य्यते जगत्। एतद्योनीनि भूतानि सर्व्वाणीत्युपधारय। अहं कृत्स्नस्य जगतः प्रभवः प्रलयस्तथा॥ तत्त्वसन्दर्भे। यर्व्वैव यदेकं चिद्रूपं ब्रह्ममायाश्रयतावलितं विद्यामयं तर्व्वैव तन्माया विषयतापन्न मविद्यापरिभूतं चैत्ययुक्तमिति। जीवेश्वरविभागोऽवगतः। ततश्च स्वरूपसामर्थ्यवैलक्षण्येन तत्द्वितीयं मिथो विलक्षणस्वरूपमेव दृष्टमित्यागतं। नचोपाधि तारतम्यमयपरिच्छेदप्रतिविम्बत्वादि व्यवस्थया तयोर्विभागः स्यात्। तत्र यद्युपाधेरनाविद्यकत्वेन वास्तवत्व तर्च्चविषयस्य तस्य परिच्छेद विषयत्वासम्भवः। निर्द्धर्म्मकस्य व्यापकस्य निरवयवस्य

प्रतिबिम्बत्वायोगोऽपि उपाधिसम्बन्धाभावात् बिम्बप्रतिबिम्बभेदाभावात् दृश्यत्वाभावाच्च। उपाधिपरिच्छिन्नाकाशस्थ ज्योतिरंशस्यैव प्रतिबिम्बो दृश्यते नत्वाकाशस्य। दृश्यत्वाभावादेव। तथा वास्तवपरिच्छेदादौ सति सामान्याधिकरण्ये ज्ञानमात्रेण तत्त्यागश्च भवेत्। तत्पदार्थप्रभावस्तत्र कारणमिति चेदस्माकमेव मतं सम्मतं। तटस्थया रश्मिस्थानीय चिदेकात्मशुद्धजीवरूपेणावतिष्ठते। परमात्मसन्दर्भे। एकस्य पुरुषस्य नानात्वमुपपाद्य तस्य पुनरंशाविव्रियन्ते। तत्र द्विविधा अंशाः स्वांशा विभिन्नांशाश्च विभिन्नांशास्तटस्थशक्त्यात्मका जीवा इति। स्वांशास्तु गुणलीलाद्यवतारभेदेन विविधाः। अन्यत्र च। अथ परमात्मपरिकरेषु जीवस्तस्य तटस्थ लक्षणं। प्रीतिसन्दर्भे च। तदेवं तस्य रश्मिपरमाणुस्थानीयांशत्वे सिद्धे तद्वत् सर्व्वस्यामपि दशायां कर्त्तृत्वभोक्तृत्वादि स्वरूपधर्म्मा अपि सिध्यन्ति। तद्वदेव च परमेश्वरशक्त्यनुग्रहेणैव ते कार्य्यक्षमा भवन्ति। तत्र प्रकृतिविकारमयकर्त्तृत्वादिकं तदीय मायाशक्तिमयानुग्रहेण। अतएव तत्सम्बन्धात् संसारः। स्वरूपशक्तिसम्बन्धान्मायान्तर्द्धाने संसारनाशः। पाद्मोत्तरे जीवस्वरूपव्याख्या। ज्ञानाश्रयो ज्ञानगुणश्चेतनः प्रकृतेः परः। न जातो निर्व्विकारश्च एकरूपस्वरूपभाक्। अणुर्नित्यो व्याप्तिशीलश्चिदानन्दात्मकस्तथा। अहमर्थोऽव्ययः क्षेत्री भिन्नरूपः सनातनः। अदाह्योऽच्छेद्य अक्लेद्य अशोष्योऽक्षर एव च। एवमादिगुणैर्युक्तः शेषभूतः परस्यवै। मकारेणोच्यते जीवः क्षेत्रज्ञः परवान् सदा। दासभूतो हरेरेव नान्यस्यैव कदाचनेति। तथान्यत्र। अणुमात्रोऽप्ययं जीवः स्वदेहं व्याप्य तिष्ठति। यथाव्याप्य शरीराणि हरिचन्दन विप्रुषः। श्वेताश्वतरे। बालाग्रशतभागस्य शतधा कल्पितस्य च। भागो जीवः सविज्ञेयः स चानन्त्याय कल्पते। अन्यत्र श्रुतौ। एष हि द्रष्टा स्प्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्त्ता विज्ञानात्मा पुरुष इति। जीवस्वरूपश्च श्रूयते। यो विज्ञानेन तिष्ठन्निति। सुखमहमस्वाप्सं न किञ्चि-

**स्वरूपार्थैर्हीनान् निजसुखपरान् कृष्णविमुखान्**
**हरेर्माया दण्ड्यान् गुणनिगड़जालैः कलयति।**

दवेदिषमिति। अत्र जीवकर्त्तृत्वं तु परेशाधीनं तस्मात् जीवः प्रयोज्यकर्त्ता परेशस्तु हेतुकर्त्ता इति भाष्यकृन्मतं। जीवस्य बद्धावस्थायां दौर्ब्बल्यात् तस्य मायापरिभूतत्वं। मुक्तावस्थायामपि स्वगुणतः अणुस्वभावतः तद्दौर्ब्बल्यं स्यादेव तथापि तदवस्थायां स्वरूपशक्तिविलास अनुग्रहत अणोरपि जीवस्य तच्छक्ति-विशेषबलात् न मायादौरात्म्यसम्भवः। तस्मात् जीवानां तदवस्थायां अपुन-रावृत्ति लक्षणा सम्पत्ति र्भवति। भक्तिबलरहितानां कर्म्मज्ञानाश्रितानान्तु तदवस्थायामपि पतनशङ्का रक्षकाभावात्॥ ८०॥

तदेवमनन्ता एव जीवाख्यास्तटस्थाः शक्तयः। तत्र तासां वर्गद्वयं। एको वर्गोऽनादितः एव भगवदुन्मुखः। अन्यस्त्वनादित एव भगवत्पराङ्मुखः स्वभा-वतस्तदीयज्ञानभावात्तदीय ज्ञानाभावाच्च। तत्र प्रथमोऽन्तरङ्गाशक्तिविलासानु-गृहीत नित्यभगवत्परिकररूपः। अपरस्तु तत्पराङ्मुखत्वदोषेण लब्धछिद्रया मायया परिभूतः संसारी इति सिद्धान्तवाक्येन बद्धमुक्तभेदेन जीवोऽपि द्विविधः। तत्र प्रकृतिकवलितस्य जीवस्य बद्धलक्षणं वदति स्वरूपार्थैरिति। स्वरूपार्थः स्वरूपज्ञानं स्वीय चिदेकस्वरूपज्ञानं तद्रहितान् स्वरूपज्ञानशून्यानित्यर्थः। निजसुखपरान् हरिभजन सुखं परित्यज्यनिजेन्द्रियसुखमात्रानुसन्धानपरान् कामिनः। कृष्णविमुखान् कृष्ण एव मम सर्व्वस्व इति ज्ञानं विस्मृत्य जड़सुख-भोगवाञ्छापरान्, अतएव दण्ड्यान् दण्डयोग्यान् जीवान्। हरेर्मायाशक्तिः स्वीय सत्वादिगुणनिगड़जालैः कलयति भावयति बध्नाति इत्यर्थः। पुनश्च स्थूलं भूतमयं। लिङ्गं मनोबुद्ध्यहङ्कारमयं आवरणं। तेन तान् आव-रयति। क्लेशनिकरैः क्लेशास्तु पाप पापवीजाविद्याभेदेन त्रिविधाः। कर्म्म-

तथा स्थूलैर्लिङ्गैर्द्विविधवरणैः क्लेशनिकरै
र्म्महाकर्म्मालानैर्नयति पतितान् स्वर्गनिरयौ ॥ ८१ ॥

जड़मदृष्टादि शब्द व्यपदेश्यमनादिविनाशि च भवति। कर्म्मालानैः कर्म्म एव आलानं बन्धनस्तम्भ स्तैः। मायातु तान् पतितान् बद्धजीवान् स्वर्गनिरयौ स्वर्गनरकौ नयति प्रापयति। मायात्र वहिरङ्गाशक्तिः। तत्र श्रुतयः। तस्मिंश्चान्यो मायया सन्निरुद्धः। मायान्तु प्रकृतिं विद्यान्मायिनन्तु महेश्वरं। भगवत्सन्दर्भे। यद्यपीयं वहिरङ्गा तथाप्यस्यास्तटस्थशक्तिमयमपि जीवमावरितु' सामर्थ्यमस्तीति। तयेति तारतम्येन तत्कृतावरणस्य ब्रह्मादिस्थावरान्तेषु लघुगुरुभावेन वर्त्तत इति। परमात्मेत्यत्र नामाभिन्नताजनितभ्रमह्रानाय संग्रहश्लोकाः। मायास्यादन्तरङ्गायां वहिरङ्गा च सा स्मृता। प्रधानेऽपि क्वचित् दृष्टा तद्वृत्तिर्मोहिनी च सा। आद्ये त्रये स्यात् प्रकृतिश्चिच्छक्तिस्त्वन्तरङ्गिका। शुद्ध जीवेऽपि ते दृष्टे तथेशज्ञानवीर्य्ययोः। चिन्मायाशक्तिवृत्त्योस्तु विद्याशक्तिरुदीर्य्यते। चिच्छक्ति वृत्तौ मायायां योगमाया समास्मृता। प्रधानाव्याकृताव्यक्त' त्रैगुण्ये प्रकृतौ परं। न मायायां न चिच्छक्तावित्याद्यूह्यं विवेकिभिः॥ तत्त्वसन्दर्भे। मायाया जीवमोहनकर्त्तृत्व' भगवतस्तु तत्रौदासीनत्व' मतं वक्ष्यते च विलज्जमानया यस्य स्थातुमीक्षापथेऽमुया। विमोहिता विकथ्यन्ते ममाहमिति दुर्द्धियः। अत्र विलज्जमानयेत्यनेन इदमायाति। तस्या जीवसम्मोहनं कर्म्म श्रीभगवते न रोचते इति यद्यपि सा स्वयं जानाति तथापि भयं द्वितीयाभिनिवेशतः स्यादीशादपेतस्येऽति दिशा जीवानामनादि भगवदज्ञानमयवैमुख्यमसहमाना स्वरूपास्फुरणमन्यरूपावेशञ्च करोति। श्रीभगवांश्चानादित एव भक्तायां प्रपञ्चाधिकारिण्यां तस्यां दाक्षिण्यं लङ्घितु' न शक्नोति। तथा

यदा भ्रामं भ्रामं हरिरसगलद्वैष्णवजनं
कदाचित्संपश्यन् तदनुगमने स्याद्रुचियुतः।

---

तद्वयेनापि जीवानां स्वसाम्मुख्य' वाञ्छन्नुपदिशति। दैवीह्येषा गुणमयी मम माया दुरत्यया। मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते॥ सतां प्रसङ्गान्ममवीर्य्य सम्बिदो भवन्ति हृत्कर्ण रसायनाः कथाः। तज्जोषणादाश्वपवर्गवर्त्मनि श्रद्धारतिर्भक्तिरनुक्रमिष्यति॥ गोविन्दभाष्ये। प्रकृतिः सत्त्वादिगुण साम्यावस्था तमोमयादि शब्दवाच्या तदीक्षणावाप्तसामर्थ्याद्विचित्र जगज्जननी। कालस्तु भूतभविष्यद्वर्त्तमान युगपच्चिरक्षिप्रादि व्यवहारहेतुः क्षणादि परार्द्धान्तश्चक्रवत्परिवर्त्तमानाः प्रलयसर्गनिमित्तभूतो जड़द्रव्यविशेष इति॥ ८१॥

भगवद्भक्तिभावात् प्रकृतिमुक्तानां जीवानां स्वरूपं विवक्षया बद्धजीवानां स्वस्वरूपलाभप्रक्रियामाह यदा भ्रामं भ्राममिति। यदा यस्मिन् काले कर्ममार्गाश्रित नानायोनिभ्रमणसमये कदाचित् सञ्चितभक्त्युन्मुखिसुकृतिबलेन मायाबद्ध जीवस्य हरिभक्तिरसगलितं चित्तं यस्य स एवम्भूतं वैष्णव जनं संपश्यन् तदनुगमने तच्चरित्रानुकरणे रुचिर्जायते तदा तदनुकरण रूप कृष्णाप्रवृत्तिः स्यात्। कृष्णनामाद्यनुशीलनं स्यादित्यर्थः। माया दूषितदशां क्रमेण त्यजति। स्वीय चित् स्वरूप प्राप्तिरूप मुक्तिं लब्ध्वा विमलरसभोगं प्रेमभक्त्यास्वादं स लभते॥ श्रुति वचनानि। समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमानः। जुष्ट' यदा पश्यत्यन्यमीशमस्य महिमानमिति वीतशोकः॥ एवमेवैषः सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरूपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते। स उत्तमः पुरुषः। स तत्र पर्य्येति जक्षन् क्रीड़न् रममाणः। मुक्तानां लक्षणानि। आत्माऽपहतपाप्मा विजरो विमृत्युर्विशोको विजिघत्सोऽपिपासः सत्यकामः सत्यसङ्कल्पः सोऽन्वेष्टव्यः॥ तत्र

तदा कृष्णावृत्त्या त्यजति शनकैर्मायिकदशां
स्वरूपं बिभ्राणो विमलरसभोगं स कुरुते ॥ ८२ ॥
हरेः शक्तेः सर्वं चिदचिदखिलं स्यात्परिणतिः
विवर्त्तं नो सत्यं श्रुतिमितिविरुद्धं कलिमलं।

---

श्रीभागवत वचनानि। भवापवर्गो भ्रमतो यदा भवेत् जनस्य तर्ह्यच्युत सत् समागमः। सत्सङ्गमो यर्हि तदैव सद्गतौ परावरेशे त्वयि जायते मतिः॥ एषा गतिरेव दुर्लभा। रजोभिः सम संख्याताः पार्थिवैरिहजन्तवः। तेषां ये केचनेहन्ते श्रेयो वै मनुजादयः। प्रायो मुमुक्षवस्तेषां केचनैव द्विजोत्तम। मुमुक्षूणां सहस्रेषु कश्चिन्मुच्येत सिध्यति। मुक्तानामपि सिद्धानां नारायण परायणः। सुदुर्लभः प्रशान्तात्मा कोटिष्वपि महामुने। सूत्र भाष्ये च। बलवता सत्सङ्गेन कषाय पाके विद्या भवतीत्याह, अपि स्मर्य्यते। पिबन्ति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु सम्भृतं। पुनन्ति ते विषय विदूषिताशयं व्रजन्ति तच्चरणसरोरुहान्तिकमित्यादि भागवतवचनात्। श्रीभक्तिरसामृतसिन्धौ। आदौ श्रद्धा ततः साधुसङ्गोथ भजनक्रिया। ततोऽनर्थ निवृत्तिः स्यात्ततो निष्ठा रुचिस्ततः। अथासक्तिस्ततो भावस्ततः प्रेमाभ्युदञ्चति। साधकानामयं प्रेम्नः प्रादुर्भावे भवेत् क्रमः॥ ८२॥

मायावादप्रतिषेधेन सर्व्वं चिदचित् जगत् श्रीहरेरचिन्त्य युगपत् भेदाभेदप्रकाशं शिक्षयति हरेरिति। सर्व्वं चिदचित् अखिलं जगत् भगवच्छक्तेः परिणतिः परिणाम एव। यस्तु ब्रह्मविवर्त्तवादः स न सत्यं। सैव शब्दप्रमाणविरुद्धकलिमलमितिज्ञेयं। सर्व्वं चिदचित् अखिलं जगत् भगवत् शक्तेरचिन्त्य युगपत् भेदाभेदावेव। इदमेव सुनिर्मल वेदप्रमाणसिद्धं तत्त्वं। एतेन नित्यविषये पर ब्रह्मणि नित्य लक्षणः प्रेमैव सिध्यति। विवर्त्त चिन्त-

हरेर्भेदाभेदौ श्रुतिविहिततत्त्वं सुविमलं
ततः प्रेम्नः सिद्धिर्भवति नितरां नित्यविषये ॥ ८३ ॥

नादौ प्रेम्नः अनित्यत्वात् तत्सिद्धिर्न भवतीति संक्षेपसिद्धान्तः। श्रुतिः। ईशावास्यमिदं सर्व्वं यत्किञ्च जगत्यां जगत्। गीतोपनिषदि च। मया ततमिदं सर्व्वं जगदव्यक्तमूर्त्तिना। मत्स्थानि सर्व्वभूतानि न चाहं तेष्ववस्थितः। न च मत्स्थानि भूतानि पश्य मे योगमैश्वरं। भूतभृन्न च भूतस्थो ममात्मा भूतभावनः॥ भागवते च। अहमेवासमेवाग्रे नान्यत् यत् सदसत् परं। पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहं। ऋतेऽर्थं यत् प्रतीयेत न प्रतीयेत चात्मनि। तद्विद्यादात्मनो मायां यथा भासो यथातमः। यथा महान्तिभूतानि भूतेषूच्चावचेष्वनु। प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहं॥ परमात्मसन्दर्भे। प्रादेशिकस्याप्यग्नेर्दीपादेर्दाहकस्यापि तद्विलक्षणाज् ज्योत्स्ना प्रभा यथा तत् प्रकाशविस्तारः। तथा ब्रह्मणः शक्तिक्रतविस्तार इदमखिलं जगदिति। विचित्र शक्तिः पुरुषः पुराणो न चान्येषां शक्तयस्तादृशः स्युः इत्यादिकं श्वेताश्वतरोपनिषदादौ। आत्मेश्वरोऽतर्क्य सहस्रशक्तिरित्यादिकं श्रीभागवतादिषु। आत्मनि चैवं विचित्राश्च हीति ब्रह्मसूत्रे। तत्र द्वैतान्यथाऽनुपपत्त्यापि ब्रह्मण्यज्ञानादिकं कल्पयितुं न शक्यते असम्भवादेव। ब्रह्मण्यचिन्त्य शक्तिसद्भावस्य युक्तिलब्धत्वात् श्रुतत्वाच्च द्वैतान्यथानुपपत्तिश्च दूरे गता। ततश्चाचिन्त्य शक्तिरेव द्वैतोपपत्तौ कारणं पर्य्यवस्यति। तस्मान्निर्विकारादि स्वभावेन सतोऽपि परमात्मनोऽचिन्त्यशक्त्यादिना परिणामादिकं भवति। चिन्तामण्ययस्कान्तादीनां सर्वार्थप्रसवलोहचालनादिवत्। तदेतदङ्गीकृतं श्रीबादरायणेन श्रुतेश्च शब्दमूलत्वादिति। ततस्तस्य तादृशशक्तित्वात् प्राकृतवन्मायाशब्दश्चेन्द्रजालविद्यावाचित्वमपि न युक्तं। किन्तु

श्रुतिः कृष्णाख्यानं स्मरणनतिपूजाविधिगणा
स्तथा दास्यं सख्यं परिचरणमप्यात्मददनं।

---

मीयते विचित्रं निर्म्मीयतेऽनयेति विचित्रार्थकरशक्तिवाचित्वमेव। तस्मात् परमात्मशक्तिपरिणाम एव शास्त्रसिद्धान्तः। तत्र चापरिणतस्यैव सतोऽचिन्त्यया शक्त्या परिणाम इत्यसौ सन्मात्रतावभासमानस्वरूपव्यूहरूप द्रव्याख्य शक्तिरूपेणैव परिणमते न तु स्वरूपेनेति गम्यते यथैव चिन्तामणिः॥ क्वचिदस्य ब्रह्मोपादानत्वं क्वचित् प्रधानोपादानत्वं श्रूयते। तत्र सा मायाख्या परिणामशक्तिश्च द्विविधा वर्ण्यते। निमित्तांशो माया उपादानांशः प्रधानमिति। तत्र केवला शक्तिर्निमित्तं। तद्व्यूहमयी तूपादानमिति विवेकः। अतएव श्रुतावपि विज्ञानं चाविज्ञानञ्चेति कस्यचिद्विभागस्याचेतनता श्रूयते॥ ८३॥

एतावत् सम्बन्धज्ञानमालोच्याभिधेय तत्त्वं वदति। अभिधेयं भगवद्वै मुख्यविरोधन्यायात् तत्साम्मुख्यमेव। तच्च तदुपासनलक्षणं भक्तिरेवाभिधेयं वस्तु। अन्याभिलाषिताशून्यं ज्ञानकर्म्माद्यनावृतं। आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा इति लक्षणेन शुद्धा भक्तिर्लक्षिता श्रीरूपेण। क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा। सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा। अग्रतो वक्ष्यमानायास्त्रिधा भक्तेरनुक्रमात्। द्विशः षड्भिः पदैरेतन्माहात्म्यं परिकीर्त्तितमिति तन्माहात्म्यं सूचितं तेनैव। ग्रन्थेऽस्मिन् तदङ्गानि विव्रियन्ते श्रुतिरिति। श्रुतिरित्यादि नवाङ्गानि यः साधयति स विमलरसभावं लभते। तत्र साधनभक्तेर्लक्षणं क्रियते रूपेण। कृतिसाध्या भवेत् साध्यभावा सा साधनाभिधा। नित्यसिद्धस्य भावस्य प्राकठ्यं हृदि साध्यता॥ तत् साधनमपि द्विविधं वैधीभक्तिसाधनं रागानुगाभक्ति साधनञ्च। साधु

**नवाङ्गानि श्रद्धा-पवितहृदयः साधयति वा**
**व्रजे सेवालुब्धो विमलरसभावं स लभते॥ ८४॥**

शास्त्रवाक्ये श्रद्धा मूलं यत् साधनं तत् वैधी भक्तिसाधनं। यत्र रागानवाप्तत्वात् प्रवृत्तिरुपजायते। शासनेनैव शास्त्रस्य सा वैधीभक्तिरुच्यते इति वैधीभक्ति-लक्षणं श्रीहरिभक्तिरसामृत सिन्धौ दृश्यते। सा श्रद्धातु आनुकूल्यस्य सङ्कल्पः प्रातिकूल्यस्य वर्ज्जनं। रक्षिष्यतीति विश्वासो गोप्तृत्वे वरणं तथा। आत्मनिक्षेप कार्पण्ये षड्विधा शरणागतिरिति लक्षणेन लक्षिता। व्रजजनसेवालोभ मूलं यत् साधनं तदेव रागानुगा भक्तिसाधनं। शेषोक्तमेव प्रबलं झटिति फलप्रदं च। ज्ञानकर्म्मादीनां नाभिधेयत्वं मुक्तिभुक्तिफलसाधकत्वात् प्रेमसाधनायोग्य-त्वाच्च। आत्मा वा अरे द्रष्टव्यः श्रोतव्यो निदिध्यासितव्य इत्यादि वेदवचन-प्रमाणानि बहवः सन्ति। कर्म्मज्ञानादीनां न साक्षादभिधेयत्वं। श्रुतौ नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैषवृणुते तेन लभ्यस्तस्यैष आत्मा वृणुते तनुं स्वां। भागवते। तथापि ते देव पदाम्बुजद्वय-प्रसादलेशानुगृहीत एवहि। जानाति तत्त्वं भगवन्महिम्नो न चान्य एकोपि चिरं विचिन्वन्। अतः सुकृतिबलेन साधुसङ्ग लाभानन्तरं या शरणा-पत्ति लक्षणा श्रद्धा उदयति तया श्रवणं कीर्त्तनं विष्णोः स्मरणं पादसेवनं। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनं इति भक्तेर्नवाङ्गानि लक्षिताणि। तत्र श्रुतिः श्रवणं। स च श्रीकृष्णनामरूपगुणलीलामयशब्दानां श्रोत्रस्पर्शः। महज्जनोच्चारितनामादेः श्रवणस्य विशेषमाहात्म्यं। भगवन्नामरूपगुणलीला-मयशब्दानां जिह्वास्पर्श एव कीर्त्तनं। कृष्णनामरूपगुणलीलास्मृतिरेव स्मरणं। तच्च स्मरण, धारणा, ध्यानानुस्मृतिसमाधिभेदात् पञ्चविधं। यत्किञ्चित् अनु-सन्धानं स्मरणं। पूर्व्वचिन्तितविषयात् समाकृष्य साम्याकारेण मनोधारणमेव

धारणा। विशेषरूपेण रूपादिचिन्तनं ध्यानं। अमृतधारावत् अनवच्छिन्नं तद् ध्रुवानुस्मृतिः। ध्येयमात्रस्फुरणं समाधिः। पादसेवनं परिचर्य्या तत्र स्वस्मिन्न-किञ्चनत्व सेवायोग्यत्वबुद्धिः तथा सेव्य वस्तुनि सच्चिदानन्दघनत्वबुद्धिश्च कार्य्या। श्रीमूर्त्तिदर्शनस्पर्शपरिक्रमानुव्रजनतुलसीवैष्णवसेवन भगवन्मन्दिर-गङ्गा द्वारकादितीर्थदर्शनादयोप्यन्तर्भाव्या। अर्च्चनं तदागमोक्तावाहनादि क्रमकं। ये तु सम्पत्तिमन्तो गृहस्थास्तेषां त्वर्च्चनमार्ग एव मुख्यः। आवा-हन क्रमो यथा। आवाहनं चादरेण सम्मुखीकरणं प्रभोः। भक्त्या निवे-षणं तस्य संस्थापनमुदाहृतं। तवास्मीति तदीयत्वदर्शनं सन्निधापनं। क्रिया-समाप्तिपर्य्यन्तस्थापनं सन्निरोधनं। सकलीकरणं प्रोक्तं तत् सर्व्वाङ्गप्रकाशनं। निवेद्यार्पण वैष्णवचिह्नानि निर्म्माल्यधारणचरणामृतपानादीनि अर्च्चनाङ्गानि। भगवज्जन्मदिन कार्त्तिकव्रतैकादशीव्रतमाघस्नानादिकं अत्रैवान्तर्भाव्यं। वन्दनमेव नमस्कारः। नमस्कारे एकहस्तकृतत्व वस्त्रावृतदेहत्व भगवदग्रपृष्ठ-वामभागात्यन्तनिकटगर्भमन्दिरगतत्वादिमया अपराधाः परिहर्त्तव्याः। दास्यं तच्च श्रीकृष्णस्य दासम्मन्यत्वं। नमः स्तुति सर्व्वकर्म्मार्पणपरिचर्य्याचरण-स्मृतिकथाश्रवणात्मकं दास्यमिति सिद्धान्तितं। स्तुतिर्विज्ञप्तिः। सा च संप्रार्थनामयी, दैन्यबोधिका लालसामयी भेदेन त्रिविधा। सख्यं। तच्च हिताशंसनमयं बन्धुभावलक्षणं। आत्मनिवेदनं। तच्च देहादिशुद्धात्मपर्य्यन्तस्य सर्व्वतोभावेन तस्मिन्नेवार्पणं। तत् कार्य्यं चात्मार्थचेष्टाशून्यत्वं तन्न्यस्तात्म-साधनसाध्यत्वं। तदर्थचेष्टामयत्वञ्च। श्रीहरिभक्तिरसामृतसिन्धौ भक्तिसम्बन्धे यान्यानि वाक्यानि कथितानि तानि यथा। भुक्तिमुक्तिस्पृहा यावत् पिशाची हृदि वर्त्तते। तावत् भक्तिसुखस्यात्र कथमभ्युदयो भवेत्। अत्रत्याज्यतयैवोक्ता मुक्तिः पञ्चविधापि चेत्। सालोक्यादिस्तथाप्यत्र भक्त्यानातिविरुध्यते। सुखैश्वर्य्योत्तरा सेयं प्रेमसेवोत्तरेत्यपि। सालोक्यादिर्द्विधा तत्र नाद्यासेवा जुषां मता। किन्तु प्रेमैकमाधुर्य्यभुज एकान्तिनो हरौ। नैवाङ्गीकुर्व्वते

ज्ञातु मुक्तिं पञ्चविधामपि । तत्राप्येकान्तिनां श्रेष्ठा गोविन्द ह्वतमानसाः । येषां श्रीश प्रसादोऽपि मनो हर्तुं न शक्नुयात् । सिद्धान्ततस्त्वभेदेऽपि श्रीश-कृष्णस्वरूपयोः । रसेनोत्कृष्यते कृष्णरूपमेषा रसस्थितिः । शास्त्रतः श्रूयते भक्तौ नृमात्रस्याधिकारिता । निषिद्धाचारतो दैवात् प्रायश्चित्तन्तु नोचितं । तस्माद्गुरुं प्रपद्येत जिज्ञासुः श्रेय उत्तमं । शाब्दे परे च निष्णातं ब्रह्मण्युपशमाश्रयं । सम्यग्यः श्रेयसां हेतुः पन्थाः सन्तापवर्ज्जितः । अनवाप्त-श्रमं पूर्व्वं येन सन्तः प्रतस्थिरे । अचिरादेव सर्व्वार्थः सिद्धस्तेषामभीप्सितः । सद्धर्म्मस्यावबोधाय येषां निर्ब्बन्धिनी मतिः । यावता स्यात् स्वनिर्व्वाहः स्वीकुर्य्यात् तावदर्थवित् । आधिक्ये न्यूनतायाञ्च च्यवते परमार्थतः । अलब्धे वा विनष्टे वा भक्ष्याच्छादनसाधने । अविक्लवमतिर्भूत्वा हरिमेवधिया स्मरेत् । शोकामर्षादिभिर्भावैराक्रान्तं यस्यमानसं । कथं तत्र मुकुन्दस्य स्फूर्त्तिसम्भा-वना भवेत् । पितेवपुत्रं करुणो नोद्वेजयति यो जनं । विशुद्धस्य हृषीकेशस्तूर्णं तस्य प्रसीदति । यावन्ति भगवद्भक्तेरङ्गानि कथितानि ह । प्रायस्तावन्ति तद्भक्त भक्तेरपि बुधा विदुः । केषाञ्चित् क्वचिदङ्गानां यत् क्षुद्रं श्रूयते फलं । वहिर्म्मुख प्रवृत्त्यै तत् किन्तु मुख्य फलं रतिः । सम्मतं भक्तिविज्ञानां भक्त्यङ्गत्वं न कर्म्मणां । ज्ञान वैराग्ययोर्भक्ति प्रवेशायोपयोगिता । ईषत् प्रथममेवेति नाङ्गत्वमुचितं तयोः । यदुभे चित्तकाठिन्य हेतुप्राये सतां मते । सुकुमारस्वभावेयं भक्तिस्तद्धेतुरीरिता । किन्तु ज्ञान विरक्त्यादिसाध्यं भक्त्यैव सिध्यति ॥ रुचिमुद्वहतस्तत्र जनस्य भजने हरेः । विषयेषु गरिष्ठोपि रागः प्रायो विलीयते ॥ अनासक्तस्य विषयान् यथार्हमुपयुञ्जतः । निर्ब्बन्धः कृष्णसम्बन्धे युक्तं वैराग्यमुच्यते ॥ प्रापञ्चिकतया बुद्ध्या हरिसम्बन्धि वस्तुनः । मुमुक्षुभिः परित्यागो वैराग्यं फल्गु कथ्यते ॥ धनशिष्यादिभिर्द्वारैर्या भक्ति-रुपपद्यते । विदूरत्वादुत्तमता हान्या तस्याश्च नाङ्गता ॥ कृष्णोन्मुखं स्वयं यान्ति यमाः शौचादयस्तथा । इत्येषाञ्च न युक्ता स्याद्भक्त्यङ्गान्तरपातिता ॥

साभक्तिरेक मुख्याङ्गाश्रितानेकाङ्गिकाथवा। स्ववासनानुसारेण निष्ठातः सिद्धिकृद्भवेत्॥ अथ रागानुगा भक्तिसाधनं श्रीरूपगोस्वामिना विवृतं विराजन्तीमभिव्यक्तं व्रजवासिजनादिषु। रागात्मिकामनुसृता या सा रागानुगोच्यते॥ रागानुगा विवेकार्थमादौ रागात्मिकोच्यते॥ इष्टे स्वारसिकी रागः परमाविष्टता भवेत्। तन्मयी या भवेद्भक्तिः साच रागात्मिकोच्यते॥ सा कामरूपा सम्बन्धरूपा चेति भवेद्द्विधा॥ कामाद्गोप्यो भयात् कंसो द्वेषाच्चैद्यादयो नृपाः। सम्बन्धाद्वृष्णयः स्नेहाद्यूयं भक्त्या वयं विभो! आनुकूल्य विपर्य्यासाद्भीति द्वेषौ पराहतौ। स्नेहस्य सख्यवाचित्वाद्वैधभक्त्यनुवर्त्तिता॥ किम्बा प्रेमाभिधायित्वान्नोपयोगोऽत्र साधने। भक्त्यावयमिति व्यक्तं वैधी भक्तिरुदीरिता॥ यदरीणां प्रियाणाञ्च प्राप्यमेकमिवोदितं। तद्ब्रह्मकृष्णयोरैक्यात् किरणार्कोपमायुषोः॥ ब्रह्मण्येव लयं यान्ति प्रायेण रिपवो हरेः। केचित् प्राप्यापि सारूप्याभासं मज्जन्ति तत् सुखे॥ सा कामरूपा सम्भोगतृष्णां या नयति स्वतां। यदस्यां कृष्णसौख्यार्थमेव केवलमुद्यमः॥ इयन्तु व्रजदेवीषु सुप्रसिद्धा विराजते। आसां प्रेम विशेषोयं प्राप्तः कामपि माधुरीं। तत्तत् क्रीड़ा निदानत्वात् काम इत्युच्यते बुधैः॥ सम्बन्धरूपा गोविन्दे पितृत्वाद्यभिमानिता। अत्रोपलक्षणतया वृष्णीणां वल्लभा मताः। यदैश्वय्यज्ञानशून्यत्वादेषां रागे प्रधानता॥ रागात्मिकाया द्वैविध्याद्द्विधारागानुगा च सा। कामानुगा च सम्बन्धानुगा चेति निगद्यते॥ रागात्मिकैक निष्ठा ये व्रजवासिजनादयः। तेषां भावाप्तये लुब्धो भवेदत्राधिकारवान्। तत्तद्भावादिमाधुर्य्ये श्रुतेधीर्यदपेक्षते। नात्र शास्त्रं न युक्तिञ्च तल्लोभोत्पत्तिलक्षणं॥ वैधभक्त्यधिकारी तु भावाविर्भावनावधिः। अत्र शास्त्रं तथा तर्कमनुकूलमपेक्षते॥ कृष्णं स्मरन् जनञ्चास्य प्रेष्ठं निज समीहितं। तत्तत् कथा रतश्चासौ कुर्य्याद्वासं व्रजे सदा॥ सेवासाधकरूपेण सिद्धरूपेण चात्र हि। तद्भावलिप्सुना कार्य्या व्रजलोकानुसारतः॥

**स्वरूपावस्थाने मधुररसभावोदय इह**
**व्रजे राधाकृष्ण स्वजनजनभावं हृदि वहन् ।**

श्रवणोत्कीर्त्तनादीनि वैधभक्त्युदितानि तु । यान्यङ्गानि च तान्यत्र विज्ञेयानि मनीषिभिः ॥ रिरंसां सुष्ठु कुर्व्वन् यो विधिमार्गेण सेवते । केवलेनैव स तदा महिषीत्वमियात् पुरे ॥ सा सम्बन्धानुगा भक्तिः प्रोच्यते सद्भिरात्मनि । या पितृत्वादि सम्बन्ध मननारोपणात्मिका । लुब्धैर्वात्सल्य सख्यादौ भक्तिः कार्य्यात्र साधकैः । व्रजेन्द्र सुवलादीनां भाव चेष्टितमुद्रया ॥ अत्र श्रीजीवः । पितृत्वाद्यभिमानी हि द्विधा सम्भवति स्वतन्त्रत्वेन तत् पित्रादिभिरभेदभावनया च । अत्रान्त्यमनुचितं भगवदभेदोपासनावत् तेषु भगवद्वदेवनित्यत्वे न प्रतिपादयिष्यमाणेषु तदनौचित्यात् । तथा तत्परिकरेषु तदुचितभावनाविशेषेण अपराधापातात् ॥ पुनः श्रीरूपः । कृष्णतद्भक्तकारुण्यमात्रलाभैक हेतुका । पुष्टिमार्गतया कैश्चिदियं रागानुगोच्यते ॥ वैधीभक्तिस्तु कैश्चित् मर्य्यादामार्ग इत्युच्यते ॥ ८४ ॥

तदा कृष्णावृत्त्या त्यजति शनकैर्मायिकदशामित्यादि वाक्यप्रयोगेन श्रवणकीर्त्तनादिसाधनभक्त्यनुशीलनेन किं भवतीति पूर्व्वपक्षमाशङ्क्य प्रयोजनतत्त्वमाह स्वरूपावस्थान इति । मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः इति भागवतवचनानुसारेण जीवानां स्वरूपावस्थानमेव मुक्तिरित्यायाति । अहं शुद्धचित्कणः कृष्णानुगत तत्त्वविशेषः । जगत्सम्भोगादि कार्य्यं मम पतनमेव । कृष्णचरणामृतसेवासुखमेव ममैव गतिरितिविचिन्त्यकृष्णचरणपीयूषपानतत्परः सन् सजीवः शान्तदास्यसख्यवात्सल्यमधुररसानां मध्ये अधिकारीभेदेन मधुररस एव मुख्योत्तम इति भावनया तद्रसमास्वादयति । सुतरां स्वरूपावस्थानसमये मधुररसभावोदयो हि परमप्रयोजनलाभः । तत्प्राप्त्या । व्रजे चिज्जगति । राधाकृष्णस्वजनजनभावं राधाकृष्णयो र्ये

**परानन्दे प्रीतिं जगदतुल सम्पत्सुखमहो**
**विलासाख्ये तत्त्वे परमपरिचर्य्यां स लभते ॥ ८५ ॥**

स्वजनाः परिकरजनाः तेषां जनः कैङ्कर्य्यरतस्तस्य भावं सेवादि कार्य्यविषयक स्वभावं स्वस्य हृदि वहन् गृह्नन् । परानन्दे सच्चिदानन्दे कृष्णविषये प्रीतिं । जगदतुलसम्पत्सुखं जगति यदतुल सम्पत्सुखं तत् । पुनः राधाकृष्णविलासाख्ये तत्त्वे परमपरिचर्य्यां दास्यं लभते । सिद्धान्तवाक्यानि यथा । भगवत्प्रीतिरूपा वृत्तिर्मायादिमयी न भवति किन्तु स्वरूपशक्त्यानन्दसाररूपा । प्रीतिः खलु भक्तचित्तमुल्लासयति, मम तया योजयति, विश्रम्भयति, प्रियत्वातिशयेनाभिमानयति, द्रावयति, स्वविषयं प्रत्यभिलाषातिशयेन योजयति, प्रतिक्षणमेव स्वविषयं नवनवत्वेनानुभावयति, असमोर्द्धचमत्कारेण उन्मादयति च । सा च प्रीतिरूपा भक्तिः क्रमेण पाल्यानां आश्रयात्मिका । भृत्यानां दास्यात्मिका । लाल्यानां प्रणयात्मिका च ज्ञेया । कृपायमिति भावेन अनुकम्पित्वाभिमानमयी प्रीतिर्वात्सल्यं । मत् सम मधुरशीलवान् यो निरुपाधिमत्प्रणयाश्रयविषय इति भावेन मित्रत्वाभिमानमयी प्रीतिर्मैत्राख्या द्विविधा । परस्परनिरुपाधिकोपकाररसिकतामयी सुहृदाख्या । सहविहारशाली प्रणयमयी सख्याख्याचेति । अथ कान्तोऽयमिति प्रीतिः कान्तभावः । एष एव प्रियताशब्देन श्रीरसामृतसिन्धौ परिभाषितः । प्रियस्य भावः प्रियतेति । लौकिकरसिकैरत्रैव रतिसंज्ञास्वीक्रियते । एष एव तत्तुल्यत्वात् श्रीगोपिकासु कामादिशब्देनाप्यभिहितः । स्मराख्यः कामविशेषस्त्वन्यः वैलक्षण्यात् । कामसामान्यं खलुस्पृहा सामान्यात्मकं । प्रीतिसामान्यस्तु विषयानुकूल्यात्मकस्तदनुगतविषयस्पृहादिमयो ज्ञानविशेष इति लक्षितं । अतो द्वयोः समानप्रायचेष्टत्वेऽपि कामसामान्यस्य चेष्टा स्वीयानुकूल्यतात्पर्य्या । पुरुषप्रयोजनं तावत्सुखप्राप्तिः दुःखनिवृत्तिश्च । श्रीभगवत्प्रीतौ तु सुखप्राप्तित्वं दुःखनिवृत्तित्वञ्चात्यन्तिकमिति । तथा

## प्रभुः कः को जीवः कथमिदमचिद्विश्वमिति वा

श्रुतिः। ये नाहं नामृतः स्यां किमहं तेन कुर्य्यामिति। रसं ह्येवायं लब्ध्वानन्दी भवतीति। आनन्दं ब्रह्मणो विद्वान्नबिभेति कुतश्चनेति। तस्मात् प्रीतिरेव पुरुषप्रयोजनत्वेन सर्व्वदा अन्वेष्टव्या। अत्र एतावदेव वक्तव्यं। एतद्रहस्यं श्रीगुरुचरणाश्रयेणात्मनि ज्ञातव्यं चिदनुशीलन प्रक्रियया॥८५॥

पूर्व्वोक्तदशश्लोकेन सम्बन्धाभिधेयप्रयोजनं विशदयन् जीवकर्त्तव्यता प्रदर्शिता प्रभुः क इति। जीवानां कः प्रभुः। कोऽसौ जीवः। इदं चिदचिद्विश्वं कथं वा। सम्बन्धाभिधेयप्रयोजनमूलकं एतदर्थत्रयं विचार्य्य। य एव शास्त्रार्थ चतुरः स हरिभजनपरो भवति। स च हरिदासाभिमानेन भक्तजनसङ्गेन च हरेर्नामानन्दं पिबति आनन्दस्य रसरूपत्वात् पानसम्बन्धः संगच्छते। तत्त्वमस्यादि-ज्ञानं अष्टाङ्ग-योगादिसाधनं परित्यज्य कथं बुद्धिमतां हरिनामकीर्त्तनादौ स्पृहा भवेदित्याद्याशङ्क्य नामानन्दपानं व्यवस्थाप्यते? उच्यते। श्रुतौ। ओँ आऽस्य जानन्तो नाम चिद्विवक्तन महस्ते विष्णो सुमतिं भजामहे। ओँ तत्सदित्यादि। हे विष्णो ते तव नाम चित् चित् स्वरूपं अतएव महः स्वप्रकाशरूपं। तस्मात् अस्य नाम्न आ ईषदपि जानन्तः न तु सम्यक् उच्चार माहात्म्यादि पुरस्कारेण। तथापि विविक्तन ब्रुवाणाः केवलं तदक्षराभ्यासमात्रं कुर्व्वाणाः सुमतिं तद्विषयां विद्यां भजामहे प्राप्नुमः। यतस्तदेव प्रणवव्यञ्जितं वस्तु सत् स्वतःसिद्धमिति। अतएव भयद्वेषादौ श्रीमूर्त्तेः स्फुर्त्तेरिव साङ्केत्यादवश्य मुक्तिदत्वं श्रूयते। पाद्मे। नामचिन्तामणिः कृष्णश्चैतन्य रसविग्रहः। पूर्णः शुद्धोनित्यमुक्तोऽभिन्नत्वान्नामनामिनोरिति। नामाभासस्य मुक्ति दत्त्वं श्रूयते, किन्तु तस्य प्रेमदत्वं न श्रूयते इति नाम रहस्यं। नामापराधशून्यानां शुद्ध नामसात्वानुशीलनात् नाम्नः प्रेमदत्वं उक्तं। नामापराधास्त्वेते पाद्मोक्ताः। १। सतां निन्दा, नामपराणां साधूनां अश्रेष्ठता स्थापनरूपा निन्दा। २। शिवस्य श्रीविष्णो-

विचार्य्यैतानर्थान् हरिभजनकृच्छास्त्रचतुरः।

नामादिः स्वातन्त्र्यमननं। भगवतो नामरूपगुणलीलादौ जड़बुद्ध्या भगवततेषां पृथक् ज्ञानं। अथवा श्रीशिवः श्रीविष्णोः सकाशात् पृथक् शक्ति सिद्ध ईश्वर इति मननं शिवादेर्विष्णोरवतारत्वात्।३। गुर्व्ववज्ञा। नामतत्त्व गुरूणां ब्रह्मज्ञानादि शिक्षा गुर्व्वपेक्षाहीनमननं।४। श्रुतितदनुगतशास्त्रनिन्दनं। तत्तच्छास्त्रे नाम माहात्म्यं दृष्ट्वा तत्तन्निन्दनं।५। हरिनाममहिम्नि अर्थवादमिदमिति मननं।६। हरेर्नामानि कल्पितानि इति चिन्तनं। नाम नामिनोरभेदत्वात्तद्विश्वास एव अपराधः।७। नाम बलेन पापाचरणं। नाम्नः ग्रहणात् प्राक् यद्यत् पापं कृतं तत्सर्व्वं नामग्रहणेन विध्वंशितं भवति। ततो न पापप्रवृत्तिः। क्षिप्रं भवति धर्म्मात्मा इति गीता वचनात् पूर्व्वपापसम्बन्धोऽपि अत्यल्पकालेन नामपूतस्वभावेन पराजितो भवति। किन्तु ये तु नाम बलेन पुनः पापाचरणं कुर्व्वन्ति ते किल नामापराधिनः।८। अन्य शुभ क्रियाभिर्नाम सामान्यमननं। नाम्नः चिन्तामणित्वात् स्वरूपाभिन्नत्वाच्च साक्षात् कृष्णस्वरूपत्वे सिद्धेरन्यज्ञानकर्म्मयोगतीर्थयात्रादि-शुभक्रिया तत्समा न भवति। ये तु अन्यपुण्यकर्म्मणा सह नाम्नः सामान्यं पश्यन्ति तेऽत्यपराधिनः।९। अश्रद्दधानादौ नामोपदेशः। श्रद्धया विना नाम्नि नाधिकारः अश्रद्दधाने स्वप्रतिष्ठादि स्वार्थलाभार्थं यः नामोपदेशः स एव अपराधः।१० अहं ममेत्याभिमानेन सहित नाम ग्रहणं। अहं धनी, अहं अत्युच्चवर्णी, अहं वैष्णवः सुतरां पूजनीय, अहं ज्ञानीत्यादि मिथ्याभिमानदूषितचित्तानां भगवन्नाम ग्रहणं कैतवं। अतएवापराधः। श्रीमन्महाप्रभुणा श्रीशिक्षाष्टके यन्नदितं तृणादपि सुनीचेन तरोरपि सहिष्णुना। अमानिना मानदेन कीर्त्तनीयः सदा हरिरिति तदपि सङ्गमनीयं दशम अपराध परिहारं तृणादपि वाक्यतात्पर्य्यं। सप्तम अपराध परिहारे तरोरपि सहिष्णुनेत्यादि वाक्य तात्पर्य्यं। तितिक्षात्र पापदमनतात्पर्य्यका। अमानीति वाक्येन

अभेदाशां धर्मान् सकलमपराधं परिहरन्
हरेर्नामानन्दं पिबतिहरिदासो हरिजनैः ॥ ८६ ॥
संसेव्य दशमूलं वै हित्वाऽविद्यामयं जनः ।
भावपुष्टिं तथा तुष्टिं लभते साधुसङ्गतः ॥ ८७ ॥

नवम अपराधः परिहृतः । मानदशब्देनान्य सप्तसंख्यकापराधः परिहरणीयः । नाम परायणस्य साधोः, नाम नामिनोरभेदज्ञानस्य, नामतत्त्वदेशिकस्य, नामतत्त्वप्रकाशकशास्त्रस्य, नाममाहात्म्यं सत्यमिति स्थापकस्य, नाम एव अप्राकृतवस्तु न तु कल्पितमिति निर्णायकस्य, नाम एव सर्व्वसत्क्रिया विलक्षणरूपेण श्रेष्ठमिति सिद्धान्तस्य सम्मानकरणं मानदत्वं । ईश्वरे तदधीनेषु बालिशेषु द्विषत्सु च । प्रेममैत्री कृपोपेक्षा यः करोति स मध्यम इति भागवतवचनानुसारेण कृष्णे प्रेमाचरणं तद्भक्तेषु मैत्र्याचरणं चिदचिद्ज्ञानहीनेषु विषयमुग्धेषु कृपाचरणं, द्विषत्सु मायावाद नास्तिकवाददूषित भगवत्स्वरूप विद्वेषिषु जीवस्य नित्यकृष्णदास्यज्ञानविद्वेषिषु च उपेक्षाचरणमेव यथायोग्य सर्व्वत्र मानप्रदानमित्युपदिष्टं । एतान् अपराधान्, परिहरन् । धर्म्मान्, प्रेमेतरफलप्रदान् सर्व्वप्रकारवेदोक्तान्यपि धर्म्मान्, सर्व्वधर्म्मान् परित्यज्येत्यादि गीतावाक्यात् परिहरन् । अभेदाशां मुक्तिस्पृहां । सालोक्य-सार्ष्टि-सामीप्य-सारूप्य-सायुज्यभेदेन मुक्तिरपि पञ्चविधाः । तत्र सायुज्यमुक्तेर्भक्तिविरोधात् तत्यक्तं । भगवत्सेवाद्वारभूतं सालोक्यादि चतुष्टयमपि न स्पृहनीयं तत्तत्फलानामनिवार्य्यकत्वात् श्रीकृष्णकृपया भक्तिसाधकानां तत्तत् स्पृहायाभक्तिबाधकत्वाच्च ॥ ८६ ॥

एतद्दशमूलसेवनफलमाह संसेव्य दशमूलमिति । यथा लोके दशमूलपाचनं सेवित्वा ज्वररूपमामयं दूरीकरोति तथेदमप्राकृतदशमूलसेवनेन सुकृतस्य जनस्य स्वरूपज्ञानात् अविद्यारूप आमयः नश्यति । जीवस्वभावो यो हरौ भावस्तस्य पुष्टिर्भवति । इतरतत्त्वे वैराग्यरूपा तुष्टिश्च जायते ।

इतिप्रायां शिक्षां चरणमधुपेभ्यः परिदिशन्
गलन्नेत्राम्भोभिः स्नपितनिजदीर्घोज्ज्वलवपुः।
परानन्दाकारो जगदतुलबन्धुर्यतिवरः
शचीसूनुः शश्वत् स्मरणपदवीं गच्छतु स मे ॥ ८८ ॥
गतिर्गौड़ीयानामपिसकलवर्णाश्रमजुषां
तथा चौड्रीयानामतिसरलदैन्याश्रितहृदां।

---

प्रकारान्तरेण भागवते। भक्तिः परेशानुभवो विरक्तिरन्यत्र चैष त्रिक एककालः। प्रपद्यमानस्य यथाश्नतः स्युस्तुष्टिः पुष्टिः क्षुदपायोऽनुघासं। अर्थश्चायं। प्रपद्यमानस्य हरिं भजतः पुंसः भक्तिः प्रेमलक्षणा परेशानुभवः प्रेमास्पद भगवद्रूपस्फुर्त्तिः तयोर्निर्वृतस्य ततोऽन्यत्र गृहादिषु विरक्तिः इत्येष त्रिकः एककालः भजनसमकाल एव स्यात् यथाश्नतो भुञ्जानस्य तुष्टिः सुखं पुष्टिरुदरभरणं क्षुन्निवृत्तिश्च अनुग्रासं स्युः। भक्त्यादीनां तु तुष्ट्यादयः क्रमेणैव दृष्टान्ता ज्ञेयाः। उत्तरत्राप्येतत् क्रमेणैव। भक्तितुष्ट्योः सुखैकरूपत्वात्। पुष्ट्यनुभवयोरात्मभरणैकरूपत्वात्। क्षुदपायविरक्त्योः शान्त्येकरूपत्वात्। यद्यपि भुक्तवत अन्तेपि वैतृष्ण्यं जायते भगवदनुभविनस्तु विषयान्तर एवेति वैधर्म्म्यं तथापि वस्त्वन्तरवैतृष्ण्यांश एवात्र दृष्टान्तो गम्यते ॥ ८७ ॥

इति प्रायामिति। इति प्रायां एवम्भूतां शिक्षां चरणमधुपेभ्यः भक्तेभ्यः परिदिशन् कथयन् गलन्नेत्राम्भोभिः स्रवदश्रुभिः स्नपितं आर्द्रीकृतं निजं स्वकीयं दीर्घं उज्ज्वलं वपुर्यस्य सः तथा परानन्दाकारः आनन्दमयमूर्त्तिः जगदतुलबन्धुः भुवनैकबन्धुः यतिवरः यतिश्रेष्ठः स शचीसूनुः शश्वत् सदा मे मम स्मरणपदवीं स्मृतिपथं गच्छतु प्राप्नोतु। वृत्तं शिखरिणी ॥ ८८ ॥

गतिरिति। सकलाश्च ते वर्णाश्रमाश्च सकलवर्णाश्रमाः तान् जुषते

पुनः पाश्चात्यानां सदयमनसां तत्त्वसुधियां
शचीसूनुः शश्वत् स्मरणपदवीं गच्छतु स मे ॥ ८९ ॥
अहोमिश्रागारे स्वपतिविरहोत्कण्ठहृदयः
श्लथात् सन्धेर्दैर्घ्यं दधदतिविशालं करपदोः।
क्षितौ धृत्वा देहं विकलितमतिर्गद्गदवचः
शचीसूनुः साक्षात् स्मरणपदवीं गच्छतु स मे ॥ ९० ॥
गतो बद्धद्वारादुपलगृहमध्याद्बहिरहो
गवां कालिङ्गानामपिसमतिगच्छन् वृतिगणं।
प्रकोष्ठे सङ्कोचाद्धत निपतितः कच्छप इव
शचीसूनुः साक्षात् स्मरणपदवीं गच्छतु स मे ॥९१॥

सकलवर्णाश्रमजुषः तेषां गौड़ीयानां गौड़देशवासिनां तथा दैन्यं दीनतां आश्रितं दैन्याश्रितं (द्वा आश्रिताद्यैः स इति द्वितीयासमासः) अति सरलं दैन्याश्रितं हृत् हृदयं येषां तेषां औढ्रीयानां औढ्रदेशवासिनां, पुनः तथा सदयमनसां सदयचित्तानां तत्त्वसुधियां तत्त्वज्ञानिनां पाश्चात्यानां आर्य्यानां गतिः आश्रयः स शचीसूनुः मे मम शश्वत् सद स्मरणपदवीं स्मृतिपथं गच्छतु प्राप्नोतु। वृत्तं पूर्ववत् ॥ ८९ ॥

अहो मिश्रेति। अहो आश्चर्य्यं मिश्रागारे काशीमिश्रभवने स्वपतेः कृष्णस्य विरहेण उत्कण्ठा यस्य तत्हृदयं यस्य सः तथा सन्धेः अङ्गसन्धेः श्लथात् शिथिलीभावात् अतिविशालं करपदोः दैर्घ्यं दधत् धारयन्। तथा क्षितौ देहं धृत्वा क्षितिनिपतित इत्यर्थः। विकलितमतिः विकलबुद्धिः गदगदवचः स शचीसूनुः मे मम साक्षात् स्मरणपदवीं गच्छतु प्राप्नोतु। वृत्तं पूर्ववत् ॥ ९० ॥

गत इति। बद्धं अवरुद्धं द्वारं यस्य तस्मात् उपलगृहमध्यात् प्रस्तर-

व्रजारण्यं स्मृत्वा विरहविकलान्तर्विलपितो
मुखं संघृष्यायं रुधिरमधिकं तद्दधदहो।
क्व मे कान्तः कृष्णो वदवदवदेति प्रलपितः
शचीसूनुः साक्षात् स्मरणपदवीं गच्छतु स मे ॥९२॥
पयोराशेस्तीरे चटकगिरिराजे सिकतिले
व्रजन् गोष्ठे गोवर्द्धनगिरिपतिं लोकितुमहो।
गणैः सार्द्धं गौरोद्रुतगतिविशिष्टः प्रमुदितः
शचीसूनुः साक्षात् स्मरणपदवीं गच्छतु स मे ॥९३॥

---

निर्म्मितगृहमध्यात् वहिर्गतः अहो आश्चर्य्यं वृतिगणं प्राचीरसमूहं ( प्राचीरं प्रान्ततो वृतिरित्यमरः ) समतिगच्छन् अतिक्रामन् कालिङ्गानां गवां प्रकोष्ठे गोष्ठे सङ्कोचात् हस्तपदादीनां इति शेषः कच्छप इव निपतितः स शचीसूनुः मे मम साक्षात् स्मरणपदवीं गच्छतु प्राप्नोतु। वृत्तं पूर्ववत् ॥ ९१ ॥

व्रजारण्यमिति। व्रजारण्यं व्रजभूमिं स्मृत्वा विरहेण विकलं अन्तः अन्तःकरणं यस्य सः अतएव विलपितः कृतविलापः तथा मुखं संघृष्य तत् अधिकं रुधिरं मुखघर्षणपतितमिति भावः। दधत् धारयन् मे मम कान्तः कृष्णः क्व कुत्र सत् वद वद वद इति प्रलपितः सोऽयं शचीसूनुः मे मम साक्षात् स्मरणपदवीं स्मृतिमार्गं गच्छतु प्राप्नोतु। वृत्तं पूर्ववत् ॥ ९२ ॥

पयोराशेरिति। पयोराशेः समुद्रस्य तीरे सिकतिले वालुकामये चटकगिरिराजे चटकपर्व्वते गोवर्द्धनगिरिपतिं गोवर्द्धनपर्व्वतं गोष्ठे लोकितुं द्रष्टुं भ्रान्त्या इति शेषः व्रजन् गच्छन्, तथा गणैः सार्द्धं द्रुतगतिविशिष्टः प्रमुदितः हृष्टचित्तः गौरः गौरनामा स शचीसूनुः मे मम साक्षात् स्मरणपदवीं स्मृतिपथं गच्छतु प्राप्नोतु। वृत्तं पूर्व्ववत् ॥ ९३ ॥

यस्यानुकम्पा सुखदा जनानां
संसारकूपाद्रघुनाथदासम् ।
उद्धृत्य गुञ्जाः शिलया ददौ सा
तं गौरचन्द्रं प्रणमामि भक्त्या ॥ ९४ ॥
सद्भक्तिसिद्धान्तविरुद्धवादान्
वैरस्य भावांश्च बहिर्मुखानां ।
सङ्गं विहायाथ सुभक्तगोष्ठ्यां
रराज यस्तं प्रणमामि गौरं ॥ ९५ ॥

यस्येति । जनानां सुखदा प्रीतिप्रदा यस्य सा प्रसिद्धा अनुकम्पा कृपा संसारकूपात् रघुनाथदासं उद्धृत्य शिलया गोवर्द्धनशिलयासह गुञ्जाः गुञ्जाफलानि ददौ । तं गौरचन्द्रं भक्त्या प्रणमामि । श्लोकेऽस्मिन् रघुनाथदासं उद्धृत्य गुञ्जाः ददौ इत्यत्र उद्धृत्य ददौ क्रियाद्वययोगेन रघुनाथदासं इत्यत्र कर्म्मत्वसम्प्रदानत्वयोः सन्देहे कर्म्मत्वमेव न्याय्यं तथाच तर्कवागीशः कर्त्तृकर्म्माधिकरणं करणं सम्प्रदानकं । अपादानञ्च सन्देहे परं पूर्व्वेण बाध्यते इत्युक्तवान् । जौमरास्तु अपादानसम्प्रदानकरणाधारकर्म्मणां । कर्त्तुश्चान्योऽन्यसन्देहे परमेकं प्रवर्त्तते ॥ इत्याहुः । यत्तु—"आच्छाद्यचार्च्चयित्वा च श्रुतशीलवते स्वयं । आहूयदानं कन्याया ब्राह्मो धर्म्मः प्रकीर्त्तित इति वचने सम्प्रदानत्वं दृश्यते तत् क्वचिदपवादविषयेऽप्युत्सर्गविधेर्निवेश इति न्यायात् तथाचोक्तं उत्सर्गस्यापवादेन प्रधानेन गुणस्य च । बाधा विधीयते यस्मात् ततोऽनेन न वाधिता इति । तदुदाहरणन्तु प्रदर्शितं यथा वरायाहूय कन्यां ददाति, विप्राय अर्च्चयित्वा धेनुर्दीयते इत्यादिः इत्यलं पल्लवितेन । इन्द्रवज्रा वृत्तं । स्यादीन्द्रवज्रा यदि तौ जगौ ग इति लक्षणात् ॥ ९४ ॥

सद्भक्तीति । यः प्रभुः सद्भक्तेः शुद्धभक्तेः सः सिद्धान्तः सिद्धान्तवादः

नामानि विष्णोर्वहिरङ्गपात्रे
विस्तीर्य्य लोके कलिपावनोऽभूत्।
प्रेमान्तरङ्गाय रसं ददौ य
स्तं गौरचन्द्रं प्रणमामि भक्त्या ॥ ९६ ॥

नामापराधं सकलं विनाश्य
चैतन्यनामाश्रित मानवानाम्।
भक्तिं परां यः प्रददौ जनेभ्य
स्तं गौरचन्द्रं प्रणमामि भक्त्या ॥ ९७ ॥

इत्थं लीलामयवरवपुः कृष्णचैतन्यचन्द्रो
वर्षान् द्विद्वादशपरिमितान् क्षेपयामास गार्ह्ये।
सन्यासे वै समपरिमितं यापयामास कालं
वन्दे गौरं सकलजगतामाश्रमाणां गुरुं तं ॥ ९८ ॥

---

तस्य विरुद्धवादान् तथा विरसस्य भावो वैरस्यं वैरस्यभावान् वैरस्यादिरसाभासान् तथा वहिर्मुखानां अभक्तानां सङ्गं विहाय अथ सुभक्त गोष्ठ्यां भक्तश्रेण्यां रराज शुशुभे तं गौरं प्रणमामि। वृत्तं उपजातिः॥ ९५॥

नामानीति। यः प्रभुः वहिरङ्गपात्रे वहिरङ्गभक्ते विष्णोर्नामानि विस्तीर्य्य प्रदाय लोके जगति कलिपावनोऽभूत् एवं अन्तरङ्गाय प्रेमरसं ददौ तं गौरचन्द्रं भक्त्या प्रणमामि। वृत्तं इन्द्रवज्रा॥ ९६॥

नामेति। चैतन्यनामाश्रितमानवानां सकलं नामापराधं विनाश्य निराकृत्य यः प्रभुः जनेभ्यः भाग्यवद्भ्यः परां भक्तिं प्रददौ तं गौरचन्द्रं भक्त्या प्रणमामि। वृत्तं पूर्व्ववत्॥ ९७॥

इत्थमिति। वरं लोकातिगं वपुर्यस्य सः लीलामयश्च वरवपुश्च तादृशः

दरिद्रेभ्यो वस्त्रं धनमपि ददौ यः करुणया
बुभुक्षून् योऽन्नाद्यैरतिथिनिचयान् तोषमनयत्।
तथा विद्यादानैः सुखमतिशयं यः समभजत्
स गौराङ्गः शश्वत् स्मरणपदवीं गच्छतु मम ॥ ९९ ॥
सन्न्यासस्य प्रथमसमये तीर्थयात्राच्छलेन
वर्षान् यो वै रसपरिमितान् व्याप्य भक्तिं ततान।
शेषानब्दान् वसुविधुमितान् क्षेत्रदेशे स्थितो यः
वन्दे तस्य प्रकटचरितं योगमायाबलाढ्यं ॥ १०० ॥

---

यः कृष्णचैतन्यचन्द्रः इत्थं पूर्वोक्तरूपेण गार्हस्थ्ये गृहस्थाश्रमे द्विद्वादशपरिमितान् चतुर्विंशतिमितान् वर्षान् क्षेपयामास। तथा सन्न्यासे समपरिमितं गार्हस्थ्य सम संख्यकं कालं यापयामास। तं सकलजगतां निखिलभुवनानां आश्रमाणां गुरुं आश्रमगुरुस्वरूपं गौरं वन्दे अभिवादये। मन्दाक्रान्ता वृत्तं ॥९८॥

दरिद्रेभ्य इति। यः प्रभुः करुणया कृपया दरिद्रेभ्यः दरिद्रजनेभ्यः वस्त्रं धनमपि ददौ अर्पयामास। तथा यः बुभुक्षून् भोक्तुमिच्छून् अतिथिनिचयान् अतिथिसमूहान् अन्नाद्यैः तोषमनयत् प्रापयामास। तथा यः विद्यादानैः अतिशयं सुखं समभजत् स गौराङ्गः मम शश्वत् सदा स्मरणपदवीं स्मृतिपथं गच्छतु। शिखरिणीवृत्तं ॥ ९९ ॥

सन्न्यासस्येति। यः प्रभुः सन्न्यासस्य प्रथमसमये तीर्थयात्राच्छलेन रसपरिमितान् वर्षान् षड़्वर्षान् व्याप्य भक्तिं ततान विस्तारयामास। तथा वसवः अष्टौ विधुश्चन्द्रः एकः अङ्कस्य वामगतित्वात् अष्टादशपरिमितान् शेषान् अब्दान् वर्षान् क्षेत्रदेशे स्थितः अवस्थितिमकरोत्, तस्य योगमायाबलाढ्यं योगमायाबलयुक्तं प्रकटचरितं अहं वन्दे अभिवादये। मन्दाक्रान्ता वृत्तं ॥ १०० ॥

हाहा कष्टं सकलजगतां भक्तिभाजां विशेषं
गोपीनाथालयपरिसरे कीर्त्तने यः प्रदोषे।
अप्राकट्यं वतसमभजन् मोहयन् भक्तनेत्रं
वन्दे तस्याप्रकटचरितं नित्यमप्राकृतं तत्॥ १०१॥
भक्ता ये वै सकलसमये गौरगाथामिमां नो
गायन्त्युच्चैर्विगलितहृदो गौरतीर्थे विशेषात्।
तेषां तूर्णं द्विजकुलमणिःकृष्णचैतन्यचन्द्रः
प्रेमावेशं युगलभजने यच्छति प्राणबन्धुः॥ १०२॥
षट्खवेदप्रमे शाके कार्त्तिके गोद्रुमे प्रभोः।
गीता भक्तिविनोदेन लीलेयं लोकपावनी॥ १०३॥

---

हाहेति। हा हा इति विषादसूचकोऽव्ययशब्दः तथाच हा विषाद-शुगर्त्तिषु इत्यमरः। सकलजगतां कष्टं विशेषं भक्तिभाजां भक्तानां किन्तदाह यः प्रभुः गोपीनाथालयस्य परिसरे पर्य्यन्त भुवि (पर्य्यन्त भूः परिसर इत्य-मरः) प्रदोषे सन्ध्याकाले कीर्त्तने नामकीर्त्तनकाले भक्तानां नेत्रं मोहयन् वत खेदे अप्राकट्यं अभजन् प्राप। तस्य अप्राकृतं नित्यं अप्रकटचरितं तत् वन्दे। वृत्तं पूर्व्ववत्॥ १०१॥

भक्ता इति। ये भक्ताः सकलसमये इमां नोऽस्माकं गौरगाथां विग-लितहृदः प्रेमरसार्द्रचित्ताः सन्तः उच्चैर्गायन्ति विशेषात् विशेषतः गौरतीर्थे, द्विजकुलमणिः ब्राह्मणश्रेष्ठः प्राणबन्धुः कृष्णचैतन्यचन्द्रः श्रीगौराङ्गः तेषां (सम्बन्धविवक्षया षष्ठी) तूर्णं शीघ्रं युगलभजने श्रीराधाकृष्णभजनविषये प्रेमावेशं यच्छति प्रददाति (दानधातो लटि तिप्) मन्दाक्रान्ता वृत्तं॥ १०२॥

षट्खषेदेति। षट्खवेदमिते षड़धिकचतुःशतमाने, वर्षे गौराब्दे

यत्प्रेममाधुर्य्यविलासरागा-
न्नन्दात्मजो गौड़विहारमाप।
तस्यै विचित्रा वृषभानुपुत्र्यै
लीलामया तस्य समर्पितेयम्॥ १०४॥

इति श्रीभक्तिविनोद विरचितं श्रीश्रीमद्गौराङ्गस्मरण-मङ्गलस्तोत्रं समाप्तम्।

---

कार्त्तिके सौरकार्त्तिके मासि गौद्रुमे तदाख्यस्थाने भक्तिविनोदेन तदाख्य-भक्तविशेषेण इयं प्रभोः लोकपावनी लीला गीता रचितेत्यर्थः॥ १०३॥

यत्प्रेमेति। यस्याः श्रीराधिकायाः प्रेममाधुर्य्यस्य यो विलासस्तत्रागात् अनुकरणस्पृहया नन्दात्मजः श्रीकृष्णः गौड़विहारमाप स्वीचकार। तस्यै वृषभानुपुत्र्यै श्रीराधिकायै तस्य श्रीकृष्णस्य विचित्रा इयं लीला मया समर्पिता प्रदत्ता। श्रीराधिकाचरणकमले समर्पितोऽयं ग्रन्थोपहारः इति भावः। इन्द्रवज्रा वृत्तं स्यादीन्द्रवज्रा यदि तौ जगौ ग इति लक्षणात्॥ १०४॥

इति श्रीशितिकण्ठवाचस्पति विरचिता श्रीमद्गौराङ्गलीलास्मरणमङ्गल-स्तोत्रे विकाशिनी नाम टीका समाप्ता।

# APPENDIX A.

## श्रीश्रीशिक्षाष्टकम् ।

### चेतोदर्पणमार्जनं भवमहादावाग्निनिर्व्वापणं

---

पञ्चतत्त्वान्वितं नित्यं प्रणिपत्य महाप्रभुम् । नाम्ना सन्मोदनं शिक्षाष्टकभाष्यं प्रणीयते ॥ भगवान् ब्रह्म कार्त्स्न्येन त्रिरन्वीक्ष्य मनीषया । तदध्यवस्यत्कूटस्थो रतिरात्मन् यतोभवेदिति सिद्धान्तवाक्येन केवलं भक्तेः परमार्थप्रदत्वं सिध्यति नान्येषां कर्म्मज्ञानादीनां । शास्त्रार्थावधारणमयीं श्रद्धां वा भगवल्लीलामाधुर्य्यलोभं विना शुद्धा भक्तिर्लभ्या न भवति । जातायामपि तथाभूतश्रद्धायां सत्सङ्गेन विना श्रवणकीर्त्तनलक्षणा हरिकथा न सम्भवति । सतां प्रसङ्गान्मम वीर्य्यसंविदो भवन्ति हृत्कर्णरसायनाः कथा इत्यादिना सत्सङ्गप्रभावेन भगवन्नामरूपगुणलीलानुकीर्त्तनं स्यात् । श्रीमन्महाप्रभुशिक्षायां सर्व्वादौ तस्य माहात्म्यं निगदितं । श्रीकृष्णकीर्त्तनस्य सर्व्वमङ्गलस्वरूपत्वात् चतुर्थपादान्तर्गतपरमिति शब्देन श्रद्धासत्सङ्गानन्तरं भजनक्रियान्तर्गतश्रीकृष्णसंकीर्त्तनमेवात्र बोद्धव्यं नतु प्रतिविम्बभक्त्याभासान्तर्गतहरिसंकीर्त्तनम् । अत्राष्टके सम्बन्धाभिधेयप्रयोजनविचारगर्भजीवकर्त्तव्यता स्वकीयवचनव्याजेनोक्ता । अस्मिन् भाष्ये तत्तद्विषयविचारोऽपि संक्षेपेण वक्तव्यः । शुद्धवैष्णवजनपरिषेवितचरणः श्रीमत् कृष्णचैतन्यचन्द्रो वदति श्रीकृष्णसंकीर्त्तनं विजयत इति । मायाशक्तिप्रसूतप्रापञ्चिके विश्वे कथं कृष्णकीर्त्तनं विजयते ? श्रूयतां । एकमेवाद्वितीयमिति श्रुतेः परमतत्त्वस्यैकत्वं नेह नानास्ति किञ्चन

## श्रेयःकैरवचन्द्रिकावितरणं विद्यावधूजीवनम्।

इति श्रुतिवचनात्तत्त्वस्य निर्व्विशेषत्वं सर्व्वं खल्विदं ब्रह्मेति निगमवचनात्त-स्यैव सर्व्वदा सविशेषत्वं सिद्धं। युगपत् सविशेषनिर्व्विशेषौ सिद्धौ सविशेषस्य प्रतीतिरेव सुतरां बलवती निर्व्विशेषस्योपलब्ध्यभावात्। अस्मत्तत्त्वाचार्य्याः श्रीमज्जीवचरणा वदन्ति। एकमेव परमतत्त्वं स्वाभाविकाचिन्त्यशक्त्या सर्व्व-दैव स्वरूप-तद्रूपवैभव-जीव-प्रधानरूपेण चतुर्द्धावतिष्ठते। सूर्य्यान्तरमण्डल-स्थिततेज इव मण्डल-तद्वहिर्गततद्रश्मि-तत्प्रतिच्छविरूपेण। अत्रेदमेवोक्तं भवति। भगवानेव परमं तत्त्वं। स एव शक्तिमान्। शक्तिशक्तिमतो-रभेद इति न्यायात् तयोरभेदः। किन्तु परास्य शक्तिर्विविधैव श्रूयत इति वेदवाक्येन तयाऽचिन्त्यशक्त्या दुर्घटघटकत्वमपि सिध्यति। अतो नित्यभेदो-ऽप्यनिवार्य्यः स तु केवलाद्वैतवादयुक्त्या न निवर्त्तनीयः। सा परा शक्तिरन्तरङ्गा तटस्थावहिरङ्गाभेदेन त्रिधावभासते। तत्रान्तरङ्गया स्वरूपशक्त्या पूर्णेनैव स्वरूपेण तत्तत्त्वं सर्व्वकल्याणगुणाश्रयतया भगवद्रूपेण नित्यं विराजते। तल्लीलासम्पादनार्थं तदानुकूल्यमय्या तया स्वरूपशक्त्या तत्तत्त्वं वैकुण्ठादि-स्वरूपवैभवरूपेणावतिष्ठते। पुनस्तटस्थशक्त्या रश्मिपरमाणुस्थानीय-चिदे-कात्मजीवरूपेण तदेव वर्त्तते। वहिरङ्गया मायाख्यया शक्त्या प्रतिच्छवि-गतवर्णशावल्यस्थानीयतदीयवहिरङ्गवैभव-जड़ात्मप्रधानरूपेणापि तल्लक्ष्यते। एवम्प्रकारेण जीव-जड़-वैकुण्ठभगवत्स्वरूपाणामचिन्त्यभेदाभेदौ ज्ञेयौ। जीव-स्यापि तदेकदेशत्वं तदाश्रयत्वात्। वहिश्चरत्वं तज्ज्ञानाभावात् छायया रश्मिवत् माययाभिभाव्यत्वाच्च व्यपदिश्यते। तच्छक्तित्वञ्च तथैव तदीयलीलोप-करणत्वात्। तटस्थशक्तिस्वभावात्तस्य मायाभिभाव्यत्वमपि सम्भवति। माया-वशतापन्नानां तेषां जीवानां संसारदुःखम्। स्वरूपशक्तिसम्बन्धान्मायान्त-र्द्धाने संसारनाशः स्वस्वरूपावस्थितिश्च। मायामुग्धानां जीवानां पुनः पुनः-

## आनन्दाम्बुधिवर्द्धनं प्रतिपदं पूर्णामृतास्वादनं

संसारक्लेशानुभवानन्तरं यदा सत्प्रसङ्गात् शास्त्रतात्पर्य्ये विश्वासी भगवन्माधुर्य्ये लोभी वा जायते तदा तेषां स्वरूपशक्तेर्ह्लादिनीसारवृत्तिभूतायां भक्तावधिकारी भवति। जातया श्रद्धया गुरुचरणाश्रयरूपसत्सङ्गप्रभावात् तत्त्वश्रवणं घटते। श्रवणानन्तरं यदा तत्कीर्त्तनं भवति तदा मायादमनप्रक्रियारूपजीवस्वरूपविक्रम एव लक्ष्यते। प्रपञ्चे हरिकीर्त्तनविजयस्यैषा प्रक्रिया। एवम्भूतलक्षणकीर्त्तनाज्जीवस्य सप्तप्रकारफलसिद्धिरपि दर्शिता चेतोदर्पणमार्ज्जनमित्यादिना। तान्येव पृथक् पृथक् विवेचयिष्यामि॥ चेतोदर्पणमार्ज्जनमित्यादिना जीवस्य स्वरूपतत्त्वं विवृतं। तथा श्रीमज्जीवचरणाः। जीवाख्यसमष्टिशक्तिविशिष्टस्य परमतत्त्वस्य खल्वंश एको जीवः। स च तेजोमण्डलस्य वह्निश्चररश्मिपरमाणुरिव परमचिदेकरसस्य तस्य वहिश्चरचित्परमाणुः। तथा श्रीमद्वेदान्तभाष्यकारोपि। विभुचैतन्यमीश्वरोऽनुचैतन्यं जीवः नित्यं ज्ञानादिगुणकत्वं अस्मदर्थत्वं चोभयत्र ज्ञानस्यापि ज्ञातृत्वं प्रकाशस्य रवेः प्रकाशकत्ववदविरुद्धं। तत्रेश्वरः स्वतन्त्रः स्वरूपशक्तिमान् प्रकृत्याद्यनुप्रवेशनियमनाभ्यां जगद्विदधत्। भक्तिव्यङ्ग्य एकरसः प्रयच्छति चित्सुखं स्वरूपं। जीवास्त्वनेकावस्था बहवः। परेशवैमुख्यात्तेषां बन्धस्तत्साम्मुख्यात्तु तत्स्वरूपतद्गुणावरणरूपद्विविधबन्धनिवृत्तिस्तत्स्वरूपादिसाचात्कृतिरिति। एतेन जीवस्याणुत्वं चित्स्वरूपत्वं शुद्धाहङ्कारशुद्धचित्तशुद्धदेहविशिष्टत्वञ्च ज्ञापितं। परेशवैमुख्यात् वहिरङ्गभावाविष्टत्वाच्च शुद्धाहङ्कारगतशुद्धचित्तस्याविद्यामलदूषणमपि सूचितं। जीवस्य शुद्धस्वरूपे यत् शुद्धचित्तं तस्मिन्मायावरणरूपाऽविद्यामलदूषिते सति चित्तदर्पणस्य कार्य्याचमत्वं सुतरां घटते। ततः कारणात् स्वरूपयाथार्थ्यदर्शनं न सम्भवति। किन्तु ह्लादिनीसारवृत्तिभूता भक्तिर्यदा प्रवर्त्तेत तदा श्रवणानन्तरं

## सर्व्वात्मस्नपनं परं विजयते श्रीकृष्णसंकीर्त्तनम् ॥१॥

श्रीकृष्णसंकीर्त्तनं प्रादुर्भूय सर्व्वाण्यविद्यामलानि दूरीकरोति। तदा प्रकटित-शुद्धचित्तो जीवः शुद्धाहङ्कारयुक्तः परेशजीवप्रकृतिकालकर्म्मात्मकं पञ्चतत्त्वं स्वचित्तदर्पणे यथायथं पश्यतीति भावः॥ चित्तदर्पणे मार्ज्जिते सति स्वरूपयाथार्थ्यदर्शनात् स्वधर्म्मदर्शनमपि घटते। स्वधर्म्मः भगवद्दास्यमिति। तत्प्रवृत्तौ संसारप्रवृत्तिस्तु कृष्णसेवाप्रवृत्तिरूपेण परिणमति। भवः जीवस्य प्रपञ्चजन्म। स एव महादावाग्निस्तन्निर्व्वापणं निर्व्वाणं श्रीकृष्णसंकीर्त्तनं विना न भवेदिति भावः॥ स्वधर्म्मज्ञाने लब्धे सति श्रीकृष्णकीर्त्तनं किं समाप्यते? नहि नहि। हरिकीर्त्तनस्य नित्यधर्म्मत्वं सिद्धे तस्यैव स्वरूपगतधर्म्माङ्गत्वमिति वदन् श्रेयःकैरवचन्द्रिकावितरणमिति विशेषणं व्यवहरति। मायामुग्धजीवानां मायाभोग एव प्रेयस्ततोदुर्न्निवारः संसारः। मायावैलक्षण्यपूर्व्विका श्रीकृष्णसेवा तु तेषां श्रेयः। श्रेय एव कैरवं कुमुदं तत्प्रकाशिका भावचन्द्रिका तां वितरयति। भक्त्या संजातया भक्त्या इति न्यायेन श्रद्धावतां श्रवणकीर्त्तनाद्याभासभक्त्या शुद्धा भक्तिः प्रादुर्भवति। अत्र चन्द्रोपमा तु तन्निःसृतामृतकल्पनयेति॥ ननु शुद्धभक्तिलब्धानां कदा स्वस्वरूपप्राप्तिरिति पूर्व्वपक्षमाकलय्य विद्यावधूजीवनमिति वदति श्रीगौर-चन्द्रः। भगवच्छक्तिर्वस्तुत एका। तस्या द्वे वृत्ती विद्याऽविद्या च। विद्यया सा योगमायास्वरूपशक्तिरिति परिचीयते। अविद्यया सा जड़प्रसविनी जीवस्वरूपगुणावरणकारिणी च। श्रवणकीर्त्तनादिसाधनसमये यदा शुद्धा भक्तिरुदेति तदा स्वस्याऽविद्यत्वं परिहृत्य विद्यया चिदितरविलक्षणजननी। सापि जीवस्य स्थूललिङ्गमयमौपाधिकदेहद्वयं विनाश्य तस्य स्वरूपगतं शुद्धचि-द्देहं अधिकारभेदेन मधुररसास्वादनायतनं गोपिकादेहमपि प्रकटयति। अतः कृष्णसंकीर्त्तनस्य विद्यावधूजीवनत्वं सिद्धं भवति। स्वरूपशक्तेः

## नाम्नामकारि बहुधा निजसर्व्वशक्ति

श्रीकृष्णबधूत्व' लीलाविलासवर्णनादौ द्रष्टव्य' ॥ स्थूललिङ्गमयमायिक-शरीरे गते सति जीवस्याणुत्व' निर्म्मलं भवति। तदा तस्य सुखमपि परमाणु-स्वरूपत्वात् चुद्र' भवतीति पूर्व्वपचमाशङ्क्य श्रीशचीनन्दनः शिक्षयति आन-न्दाम्बुधिवर्द्धनमिति। तदवस्थायां श्रीकृष्णसंकीर्त्तनं तस्य जीवस्य स्वाभा-विकमानन्दं ह्लादिनीसारवृत्त्यानन्त्येन संवर्द्धयति। शुद्धस्वरूपप्राप्तजीवो-ऽप्यनन्तानन्द' लभत इति भावः॥ तदवस्थायां चिदेकरसः सन् जीवः प्रतिपदं पदे पदे अनुरागेण पूर्णामृतास्वादनं लभते। नित्यनूतनविग्रहे भगवति तृष्णानिवृत्त्यभावात् नित्यनूतनरससम्भोगोऽपि घटनीयः॥ भोग-चेष्टाया अपि शुद्धप्रेमविरोधित्वात् कथं तदवस्थायां निर्म्मलानन्दलाभः स्यादिति विचिन्त्य श्रीसन्न्यासिचूड़ामणिः सर्व्वात्मस्नपनमिति विशेषणं योज-यति। तदवस्थायां कृष्णानन्दस्य नैर्म्मल्यात् स्वकामभोगादिवाञ्छारहितोऽयं जीवः स्वभावतीह्लादिनी महाभावमयी श्रीमतीराधिकापरिचारिकास्वरूपेण युगलविलासविषयान् सर्व्वानन्दान् समश्नुते। अत्र सर्व्वात्मस्नपनमिति पद-द्वयेन मुक्तस्य सायुज्यान्तर्गतब्रह्मलयदोषाणां स्वीयकामसम्भोगादिदोषाणाञ्च सम्पूर्णधौतिरिति परिज्ञेयं॥ एतत् सप्तगुणकं सच्चिदानन्दस्वरूपयुगल-प्रेमविचित्रलीलापरं श्रीकृष्णस्य संकीर्त्तनं विजयते विशिष्टतया सर्व्वोत्कर्षेण वर्त्तते॥ १॥

तत्र नामरूपगुणलीलाभेदेन श्रीकृष्णकीर्त्तनमपि चतुर्व्विधं। नाम्नोहि सर्व्वानन्दत्वात् नामनामिनोरभेदत्वाच्च नामकीर्त्तनस्य सर्व्वोपादेयत्व' दर्श-यन्नादौ भगवन्नाम्नि जीवानां श्रद्धोत्पत्तिकरणेच्छया भगवतश्चैतन्यदेवस्योक्तिः। हे भगवन्! मां निराश्रयं दृष्ट्वा परमकारुणिकेन भवता मुख्यगौणभेदेन स्वनामानि बहुधा प्रकाशितानि। हरि-कृष्ण-गोविन्द-अच्युत-राम अनन्त-

## स्वत्रार्पिता नियमितः स्मरणे न कालः ।

विष्ण्वित्यादिमुख्यनामानि । ब्रह्म-परमात्मा-नियन्ता-पाता-स्रष्टा-महेन्द्रेत्यादि गौणनामानि । पुनश्च निजसर्व्वशक्तिः स्वरूपशक्तेः समस्त सामर्थ्यं तत्र मुख्यनाम्नि भवतार्पिता । तद्यथा । नहि भगवन्नघटितमिदं त्वद्दर्शनान्नृणामखिलपापक्षयं । यन्नाम सकृच्छ्रवणात् पुक्कशोपि विमुच्यते संसारात् ॥ वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः । तावन्ति हरिनामानि कीर्त्तितानि न संशयः ॥ ऋग्वेदोयजुर्व्वेदः सामवेदोप्यथर्व्वणः । अधीतास्तेन येनोक्तं हरिरित्यक्षरद्वयं ॥ मा ऋचो मा यजुस्तात मा साम पठ किञ्चन । गोविन्देति हरेर्नाम गेयं गायस्व नित्यशः ॥ अवमन्यच ये यान्ति भगवत्कीर्त्तनं नराः । ते यान्ति नरकं घोरं तेन पापेन कर्म्मणा । एतन्निर्व्विद्यमानानामिच्छतामकुतोभयं । योगिनां नृप निर्णीतं हरेर्नामानुकीर्त्तनं ॥ आस्य जानन्तोनामचिद्विविक्तन महस्ते विष्णो सुमतिं भजामहे ॥ ओमित्येतद्ब्रह्मणोनेदिष्टं नाम यस्मादुच्चार्य्यमाण एव संसारभयात्तारयति । तस्मादुच्यते तारः ॥ सकृदुच्चारितं येन हरिरित्यक्षरद्वयं । बद्धोपरिकरस्तेन मोक्षाय गमनं प्रति ॥ तदश्मसारं हृदयं बतेदं यद् गृह्यमानैर्हरिनामधेयैः । न विक्रियेताथ यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ मधुरमधुरमेतन्मङ्गलं मङ्गलानां सकलनिगमवल्लीसत्फलं चित्स्वरूपं । सकृदपि परिगीतं श्रद्धया हेलया वा भृगुवर नरमात्रं तारयेत् कृष्णनाम ॥ गीत्वाच मम नामानि विचरेन्मम सन्निधौ । इति ब्रवीमि ते सत्यं क्रीतोहं तस्य चार्ज्जुन ॥ नाम चिन्तामणिः कृष्णश्चैतन्यरसविग्रहः । पूर्णः शुद्धो नित्यमुक्तोऽभिन्नत्वान्नामनामिनोः ॥ अतः श्रीकृष्णनामादि न भवेद्ग्राह्यमिन्द्रियैः । सेवोन्मुखे हि जिह्वादौ स्वयमेव स्फुरत्यदः ॥ इत्यादि श्रुतिस्मृतितन्त्रवाक्येन नाम्नः सर्व्वशक्तित्वं ज्ञापितं । कर्म्मज्ञानादिसाधने कालदेशपात्रादिनियमो बलवान् ।

एतादृशी तव कृपा भगवन्ममापि
दुर्दैवमीदृशमिहाजनि नानुरागः ॥ २ ॥

किन्तु तव नामस्मरणे तत्तन्नियमोपि न कृत इति नामविषयेऽपारकृपा मां-प्रति भवता दर्शिता। परन्तु मम दुर्दैववशात् भवन्नाम्नि ममानुरागो न अजनि। दुर्दैवमत्र नामापराधः। एतदुक्तं भवति। भगवद्बहिर्मुखो जीवो मायानिर्म्मिते विश्वे नानाविधविषयव्यापारे बद्धः। कदाचिदपि भगवत्-साम्मुख्यं प्रति न चेष्टते। परमेश्वरस्तु कर्म्मज्ञानादिविधिना जीवस्य नित्य-मङ्गलं न भवतीति विचिन्त्यापारकरुणया स्वीयस्वरूपशक्तेर्ह्लादिनी सारवृत्ति-भूतां भक्तिं जीवहृदये प्रकटयितुं तल्लाभोपायस्वरूपाणि स्वनामानि प्रका-शितवान्। परन्तु श्रुत्वापि तन्नाममाहात्म्यं जप्त्वापि त्वन्नामानि नामापराध-वशतस्तत्रानुरागो शीघ्रं जीवस्य न भवति। एतेन श्रद्धावतां गुरुमुखान्नाम-श्रवणानन्तरं सर्व्वदैव नामापराधान् परिहृत्य यथासाध्यं नामकीर्त्तनमेव कर्त्तव्यमिति सूचितं। अपराधाश्चैते। सतां निन्दा नाम्नः परममपराधं वितनुते यतः ख्यातिं जातं कथमु सहते तद्विगर्हां। शिवस्य श्रीविष्णोर्य इहगुण नामादिसकलं धिया भिन्नं पश्येत् स खलु हरिनामाहितकरः॥ गुरोरवज्ञा श्रुतिशास्त्रनिन्दनं तथार्थवादो हरिनाम्नि कल्पनं। नाम्नो बलात् यस्य हि पापबुद्धिर्नविद्यते तस्य यमैर्हि शुद्धिः॥ धर्म्मव्रतत्यागहुतादिकर्म्म शुभक्रिया साम्यमपि प्रमादः॥ अश्रद्दधाने विमुखेप्यश्रृण्वति यश्चोपदेशः शिवनामापराधः। श्रुत्वापि नाममाहात्म्यं यः प्रीतिरहितोऽधमः। अहं ममादिपरमो नाम्नि सोप्यपराधकृत्॥ नामजपपराणां कर्म्मान्तर्गतपाप-त्यागपुण्यसञ्चयचेष्टा न कर्त्तव्या तेषां श्रद्धावतां कर्म्माधिकारशून्यत्वात्। किन्तु ते यदि नामापराधयुक्ता भवन्ति तर्हि तदपराधहानाय तेषां या व्याकुलता तयाऽविश्रान्तिप्रयुक्तानि कृष्णनामानि तत्तदपराधावसरविनाशेन निसर्गतया

**तृणादपि सुनीचेन तरोरपि सहिष्णुना ।**
**अमानिना मानदेन कीर्त्तनीयः सदा हरिः ॥ ३ ॥**

तेषां हृदयं तदपराधशून्यं करोति । शास्त्रवाक्य' यथा । नामापराधयुक्तानां नामान्येव हरन्त्यघं । अविश्रान्तिप्रयुक्तानि तान्येवार्थकराणि चेति । यदा नामापराधाभावात् हरिनाम्नग्रनुरागो जायते तदा तेषां सर्व्वार्थसिद्धिरित्युपदिष्टं ॥ २ ॥

निरपराधेन हरिनामकृतां विषयविरक्तिजनितदैन्य' निर्म्मत्सरतालङ्कृतादया, मिथ्याभिमानशून्यता सर्व्वेषां यथायोग्यसम्मानना चैतानि लक्षणानि ॥ तत्र चैतन्यरसविग्रहस्वरूपश्रीकृष्णनामाविर्भावात्तेषां चिद्रसेतरविरक्तिभावेनोक्तिः । अहमेवाणुचैतन्यस्वरूपः श्रीकृष्णदासो जीवः । जड़ात्मकेषु विषयेषु न मम कुत्रचिदर्थो वर्त्तते । वर्त्तमानजड़यन्त्रितावस्था कृष्णवहिर्म्मुखदोषेण ममैव दुर्द्दशा । कृष्णकृपया यावत् ममसंसारनिवृत्तिर्नभवति तावत् सुतरां युक्तवैराग्येन श्रीकृष्णसम्बन्धज्ञानेन च जीवनयात्रोपयोगी विषयोपि मया स्वीकर्त्तव्यः । अभावरोगशोकवार्द्धक्यादिजनितदुःखप्राप्तिस्वास्थ्यबलविद्येत्यादिजनितसुखञ्च सर्व्वं प्रारब्धफलमवश्य' मया भोक्तव्य' । चित्स्वरूपस्य मम जड़विषये किञ्चिदपि नास्तीति विचिन्त्य सम्पूर्णदैन्येनाहं गृहे वने वा हा कृष्ण ! हा गौरचन्द्र ! हा प्राणनाथ ! कदाशुद्धदास्यमहं लभेयेति वदन् तिष्ठामि । अस्तु तस्य जड़वस्तुत्व' तथापि तृणस्य वस्तुत्वाभिमानं न न्यायविरुद्धं किन्तु विकृतस्वरूपस्य ममात्र वस्तुत्वाभिमानं न सुन्दरमिति तृणादपि मम सुनीचत्व' वास्तवं ॥ तरोरपि सहिष्णुनेति वाक्येन तरुः संछेदकस्यापि छायाफलदानेनोपकरोति कृष्णभक्तस्तु तदपेक्षोच्चप्रवृत्त्या दयया सर्व्वान् शत्रुमित्रानुपकरोतीति सूचितं । अनेन हरिनामकृतां निर्म्मत्सरतालङ्कृता दयारूपा द्वितीयलक्षणं भवति । निरपराधेन नामगानपर-

न धनं न जनं न सुन्दरीं
कवितां वा जगदीश कामये।

स्वोक्तिः। हा नाथ! एते मत्सङ्गिनोजीवाः केनोपायेन भवन्नाम्नि रतिं लभन्ते? ते सर्वे मायान्धाः सन्तः पुत्रकलत्रद्रविणजयपराजयसम्बन्धजनितसुखदुःखरूपद्वन्द्वकातराः। तेषामनर्थपूर्णे जड़विषये विरक्तिर्नभवति। आशापाशबद्धास्ते तुच्छानि दुःखोदर्काणि कर्म्मफलानि निर्भेदज्ञानफलानि वान्वेषयन्ति। कथमेषामात्मयाथात्म्यदर्शनरुचिर्जायते। एवं ब्रुवन् सोपि हरेर्नाम हरेर्नाम हरेर्नामैव केवलं। कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथेत्युच्चैःस्वरेणगायति॥ अमानिना शब्देनास्य मिथ्याभिमानशून्यतारूपतृतीयलक्षणं निर्दिष्टं। बद्धजीवानां स्थूललिङ्गदेहद्वयसम्बन्धयोगैश्वर्य्यभोगैश्वर्य्यधनरूपजातिवर्णबलप्रतिष्ठाधिकारेत्यादिजनितं यदभिमानं तन्मिथ्या जीवस्वरूपविरोधधर्म्मत्वात्। तत्तदभिमानशून्यता मिथ्याभिमानशून्यता। एवम्भूतमिथ्याभिमानशून्येन सर्व्वदा सत्यपि तत्तदभिमानहेतौ क्षान्तिगुणभूषितेन हरिनाम कीर्त्तनीयं। गृहे तिष्ठन् ब्राह्मणत्वाद्यहङ्कारशून्यो वने तिष्ठन् वैराग्यलिङ्गाहङ्कारशून्यश्च कृष्णैकचित्तोभक्तः कृष्णनाम कीर्त्तयति॥ मानदशब्देन यथायोग्यं सर्वेषां मानदत्वं तस्य चतुर्थलक्षणं। सर्व्वान् जीवान् कृष्णदासान् ज्ञात्वा कमपि न द्विषति प्रतिद्विषति वा। मधुरवाक्येन जगन्मङ्गलकार्य्येण च तान् सर्व्वान् तोषयति। विश्वे येऽधिकारप्राप्ता ब्राह्मणादयो ये च दिवि ब्रह्मरुद्रादिदेवादयस्तान् सर्व्वान् दैन्येन बहुमानयति। तेभ्योहरिभक्तिं प्रार्थयते च। येतु शुद्धभक्तास्तान् सर्व्वभावेन सेवते। अनेन लक्षणचतुष्टयेन भूषितस्य कृष्णनामकीर्त्तनमेव परमपुरुषार्थसाधनं भवतीति श्रीमन्महाप्रभुपादेनोपदिष्टं॥ ३॥

आदौ श्रद्दधानानां श्रीगुरुमुखात् हरिनामश्रवणं। ततो निरपराधेन तन्नामकीर्त्तनं। ततः पूर्वोक्तलक्षणचतुष्टयरूपमनुभावः। किन्तु ह्लादिनी

मम जन्मनि जन्मनीश्वरे
भवताद्भक्तिरहैतुकी त्वयि॥ ४ ॥
अयि नन्दतनूज किङ्करं
पतितं मां विषमे भवाम्बुधौ।

सारवृत्तिरूपाया भक्तेर्जड़ानन्दान्वयव्यतिरेकसम्बन्धशून्यं शुद्धस्वरूपीदयं विना भावात्मिका भक्तिर्नभवतीति विचिन्त्य नामकीर्त्तनरूपसाधनभक्तेः शुद्धस्वरूपं व्यतिरेकलक्षणेन स्पष्टयति न धनमिति श्लोकद्वयेन। यावदानुकूल्यमयी कृष्णानुशीलनरूपा भक्तिर्व्यतिरेकलक्षणात्मिकान्याभिलाषिताशून्या ज्ञान-कर्माद्यनावृता च न भवति तावत्तस्या भक्त्याभासमात्रत्वं। तदाभासत्वं परिहर्त्तुमिच्छया व्यतिरेकलक्षणेन शुद्धभक्तिं शिक्षयति। हे जगदीश! धनं जनं सुन्दरीं कवितां वाऽहं न कामये। अत्र धनपदेन वर्णाश्रमनिष्ठ-धर्मधनं ऐहिकपारत्रिकजड़सुखकरं सर्व्वमर्थधनं स्थूललिङ्गगतेन्द्रियगणा-नन्दकरं कामधनञ्च ज्ञातव्यं। जनपदेन स्वशरीरानुगस्त्रीपुत्रदासदासीप्रजा-बन्धुबान्धवादयः ज्ञातव्याः। सुन्दरीकवितापदेन सा विद्या तन्मतिर्ययेति न्यायात् भगवल्लीलातत्त्व कीर्त्तनरूपकाव्यं विना अन्यकाव्यलक्षणा सामान्य-विद्या ज्ञेया। एतत्सर्व्वमहं न याचे किन्तु जन्मनि जन्मनि त्वयि ईश्वरे प्राणेश्वरे कृष्णे अहैतुकीं भक्तिं याचे। अहैतुकी भक्तिः फलानुसन्धानरहिता चित्स्वभावाश्रया कृष्णानन्दरूपा शुद्धा केवलाऽकिञ्चनाऽमिश्रा भक्तिरिति। जन्ममरणरूपजड़यन्त्रणानिवृत्तिः कृष्णेच्छाधीना जीवचेष्टातीतविषया। तत्प्रार्थनापि न कर्त्तव्या। अतो जन्मनि जन्मनीति वक्तव्या। यदा कृष्णे-च्छया जन्ममरणनिवृत्तिस्तदा तत्तद्दुःखं स्वयमेव नश्यति किमुपायविरोधिन्या तत्प्रार्थनया? ॥ ४ ॥

ननु किं संसारदुःखं नालोचनीयं साधकेनेत्याशङ्क्य अयि नन्दतनूजेति।

कृपया तव पादपङ्कज-
स्थितधूलीसदृशं विचिन्तय ॥ ५ ॥
नयनं गलदश्रुधारया
वदनं गद्गदरुद्धया गिरा ।

हे नन्द तनुज ! अहं वस्तुविचारतस्तवनित्यकिङ्करः। अधुना निजकर्म्मदोषेण विषमे भवसागरे पतितः। कामक्रोधादिबहुशत्रुताड़ितः। दुराशादुश्चिन्तातरङ्ग प्रपीड़ितः। कुसङ्गप्रबलवायुना प्रचालितश्च। एतद्दशायां कदाचित् कर्म्मज्ञानयोगतपस्यापि तृणगुच्छा भासमाना दृश्यन्ते। तानवलम्ब्य भवसमुद्रतितीर्षा निष्फला तेषामपार्थत्वात्। बहुक्लेशपीड्यमानोनुतप्तः सन् तव कृपां विनाऽस्य भवसमुद्रस्य पारगमनेऽन्यप्लवो नास्तीति ज्ञात्वा श्रीगुरुचरणकृपया भवन्नामतरणीं प्राप्तवान्। भवानेव शरणागतवात्सल्यात् सर्व्वदोषमार्ज्जनपूर्व्वकं निराश्रितं मां करुणया भवत्पादपङ्कजस्थितधूलिसदृशं विचिन्तय विभावय। तव पादपद्मसंलग्नरेणुरिव तस्मान्न विच्छिन्नो भविष्यामीति भावः। एतेन कर्म्मज्ञानलभ्यभुक्तिमुक्तिफलकामना भक्तजनानां परित्यज्येति ज्ञातव्यं ॥ ५ ॥

पूर्व्वोक्तपञ्चश्लोकैरादौ श्रद्धा ततः साधुसङ्गस्ततः श्रवणकीर्त्तनस्मरणपादसेवनार्चनवन्दनदास्यसख्यमात्मनिवेदनात्मकं भजनं ततः स्वरूपबोधानन्तरमविद्यारूपानर्थनाशस्ततो निष्ठा ततो रुचिस्तत आसक्तिस्ततो भाव इति ह्लादिनीसारवृत्तिसहायेन जीवस्वरूपविकाशरूपपरमधर्म्मस्य क्रमो हि लचितः। भावदशायां भक्तेः शुद्धस्वरूपस्याखण्डत्वं सिध्यति। तदा भक्तिप्रेमाङ्कुरस्वरूपरतिरूपा। साधनदशास्थितश्रवणकीर्त्तनादिलक्षणानां मध्ये कृष्णनामकीर्त्तनं भावदशायामत्यन्तप्रबलं भवति। चान्तिरव्यर्थकालत्वं विरक्तिर्मानशून्यता। आशाबन्धः समुत्कण्ठा नामगाने सदारुचिः। आसक्ति-

पुलकैर्निचितं वपुः कदा
तव नामग्रहणे भविष्यति ॥ ६ ॥
युगायितं निमेषेण चक्षुषा प्रावृषायितं ।

त्वद्गुणाख्याने प्रीतिस्तद्वसतिस्थले। इत्यादयोऽनुभावाः स्युर्जातभावाङ्कुरे जन इति सिद्धान्तवाक्यात्। पुनश्च शुद्धसत्त्वविशेषात्मा प्रेमसूर्य्यांशुसाम्यभाक्। रुचिभिश्चित्तमासृण्यकृदसौ भाव उच्यत इति लक्षणेन भावस्वरूपरतेः प्रेमाङ्कुरत्वं प्रेमपरमाणुत्वं सिध्यति। प्रेम्नस्तु प्रथमावस्था भावइत्यभिधीयते। सात्त्विकाः स्वल्पमात्राः स्युरत्राश्रुपुलकादयः॥ ध्यायं ध्यायं भगवतः पादाम्बुजयुगं तदा। ईषद्विक्रियमाणात्मा सार्द्रदृष्टिरभूदसावित्यादि तन्त्रपुराणवचनेन प्रेमलक्षणाया भक्तेर्येत्वनुभावाः सात्त्विका विकारादयश्च सन्ति ते सर्व्वे कियत्परिमाणेन भावदशायामपि लक्ष्यन्ते। अनुभावाश्चैते। नृत्यं विलुठितं गीतं क्रोशनं तनुमोटनं। हुङ्कारो जृम्भनं श्वासभूमा लोकानपेक्षिता। लालास्रावोऽट्टहासश्च घुर्णा हिक्कादयोऽपि चेति। सात्त्विकविकाराश्चैते। ते स्तम्भस्वेद रोमाञ्चस्वरभेदोऽथ वेपथुः। वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विकाः स्मृता इति। एषां मध्ये नृत्यगीताश्रुपुलकस्वरभेदाः भावदशायां विशेषतो लक्षिताः॥ अतएव तद्दशां लक्षयित्वा वदति शिक्षकचूड़ामणिः श्रीगौरचन्द्रः। हे कृष्ण! हे नन्दनन्दन! तव नामग्रहणे कदा मम नयने अश्रुधारा विगलिता भविष्यन्ति, कदा वा स्वरभेदजनितेन गद्गदवाक्येन वदनं मम विक्रियां गमिष्यति। मम वपुश्च कदा पुलकितं भविता। हे नाथ! तव नामग्रहणे ममाप्यचिरेणैव तत्तद्दशालक्षणं भवतु॥ ६॥

सा रतिरूपा भक्तिः प्रेमदशायां स्थायिभावात्मिका सति विभावानुभावसात्त्विकव्यभिचारिभावसाहचर्य्येन भक्तिरसो भवति। तद्दशायां तस्याः सर्व्वेऽनुभावाः सात्त्विकादयश्च पूर्णरूपेण लक्ष्यन्ते सम्यङ्मसृणितस्वान्तो

शून्यायितं जगत् सर्व्वं गोविन्द विरहेण मे ॥ ७ ॥

ममत्वातिशयाङ्कित:। भाव: स एव सान्द्रात्मा बुधै: प्रेमा निगद्यत इति सिद्धान्तवाक्येन श्रीकृष्णे ममतातिशय्यजनितगाढ़भावमयी भक्ति प्रेमेति बोध्यं। अत्र भक्तिरसस्याश्रयविषययोर्मुख्यसम्बन्धभेदात् शान्त-दास्य-सख्य-वात्सल्य-मधुर इति पञ्चविध: मुख्यरस:। गौणसम्बन्धभेदेन हास्याद्भुतस्तथा वीर करुणा रौद्र इत्यपि। भयानक: स वीभत्स इति गौणश्च सप्तधेति। मुख्य-रसानां मध्ये मधुररस एव सर्व्वोत्कृष्ट:। स मुख्य रस: प्रेम-प्रणय-मान-स्नेह-रागानुराग-महाभावमय:। तन्नीलासमावाधिक्य व्यञ्जिता प्रीति: रति: शान्तरसेऽनुमीयते यस्यां जातायामन्यत्र तुच्छबुद्धिश्च जायते। ममताति-शयाविर्भाविन समृद्धा प्रीति: प्रेम दास्यरसे लक्ष्यते। यस्मिन् जाते तत्प्रीति भङ्ग हेतवो न प्रभवन्ति। विश्रम्भात्मक: प्रेमा प्रणय: सख्ये प्रतीयते। यस्मिन् जाते सम्भ्रमादियोग्यतायामपि तदभाव:। प्रियत्वातिशयाभिमानेन कौटील्याभासपूर्व्वक भाववैचित्र्यं दधत् प्रणयी मान:। यस्मिन् जाते श्रीभगवानपि तत्प्रणयकोपात् प्रेममयं भयं भजते। चेतो द्रवातिशयात्मक: प्रेमैव स्नेह:। यस्मिन् जाते महावास्यादिविकार: दर्शनादतृप्तिस्तस्य परम-सामर्थ्यादौ सत्यपि केषाञ्चिदनिष्टाशङ्का च जायते। द्वावेतौ वात्सल्ये लक्ष्येते। स्नेह एवाभिलाषात्मको राग:। यस्मिन् जाते क्षणिकस्यापि विरहस्यासहिष्णुता। तत्संयोग परं दु:खमपि सुखत्वेन भवति। तद्वियोगे तद्विपरीतं। स एव रागोऽनुक्षणं स्वविषयं नवनवत्वेनानुभावयन् स्वयञ्च नवनवीभवन्ननुराग:। यस्मिन् जाते परस्परवशभावातिशय: प्रेमवैचित्त्यं तत् सम्बन्धिन्यप्राणिन्यपि जन्मलालसा। विप्रलम्भे विस्फूर्त्तिश्च जायते। अनुराग एव असमोर्द्ध्वचमत्कारेण उन्मादनं महाभाव:। यस्मिन् जाते योगे निमेषासहता कल्पक्षणत्वमित्यादिकं। वियोगे क्षणकल्पत्वं इत्यादिकं।

**आश्लिष्य वा पादरतां पिनष्टुमा**
**मदर्शनान्मर्म्महतां करोतु वा ।**

उभयत्रमहोदीप्ताशेषसात्त्विकविकारादिकं जायत इति प्रीतिसन्दर्भवचन-साहाय्येन प्रेमावस्थायां विशेषत उज्ज्वलरसविक्रियायां भावसमूहानामत्रैव श्रीमन्महाप्रभुशिक्षायां समास एव लक्ष्यते । युगायितं इति पद्यं सुगमं । गोविन्दविरहेणेति वाक्येन विप्रलम्भो विज्ञापितः । स पूर्व्वरागो मानश्च प्रवासादिमयस्तथा । विप्रलम्भो बहुविधो विद्वद्भिरिह कथ्यत इति । अत्र तु महाप्रभुवाक्येन प्रपञ्चान्तर्व्वर्त्ति जीवानां पूर्व्वरागादिमयो विप्रलम्भ एव सर्व्वदा आस्वादनीयः ॥ ७ ॥

प्रेमदशालब्धानां जीवानां का प्रवृत्तिरित्यालोच्याहाश्लिष्य वा पादरतां इति । पादरतां मां आश्लिष्य सुखयतु मां पदतले पिनष्टु पेषणं करोतु अथवा अदर्शनान्मां मर्महतां मर्मपीड़ितां करोतु । स लम्पटचूड़ामणिर्यथा तथा येन तेन प्रकारेण मां विदधातु । स कदाचिन्नापरो भवति यतः स एव सर्व्वथा मम प्राणनाथः । मर्त्त्यो यदात्यक्त समस्तकर्मा निवेदितात्मा विचिकिर्षितो मे । तदाऽमृतत्व' प्रपद्यमानो मयात्मभूताय च कल्पते वै इति लक्षणेन भक्तानां प्रेमदशायां कृष्णैकजीवनत्वं । सिद्धौ च प्रेमदशायां भक्तकृष्णयोः परस्परमाकर्षणरूपः परमो धर्मो दीप्यते । यथा भ्राम्यत्ययो ब्रह्मन् स्वयमाकर्ष सन्निधौ । तथा मे भिद्यते चेतश्चक्रपाणेर्यदृच्छयेति श्रीमद्भागवतवचनात् । अत्रेदमालोच्य' । अणुचैतन्यस्य जीवस्य विभूचैतन्यस्य कृष्णस्य सम्बन्धे कचन स्वाभाविको धर्मोऽस्ति । तयोः परस्परसम्बन्धात्मकः । स च धर्मो जीवस्य वहिर्मुखदशायां लुप्तप्रायस्तिष्ठति । पुनर्यदा जीवस्य स्वभावपरिष्कृया स्यात् तदा जीव कृष्णयोरुभयगतः पूर्व्वसिद्धो धर्मः पुनः प्रकटो भवति । आकर्ष सन्निधौ परिष्कृतमयः लौहं यथातथेति । एतद्दशायां

## यथा तथा वा विदधातु लम्पटो

पूर्व्वसिद्धधर्म प्रकटने धर्मस्य साधनं प्रयोजनं नत्वन्यत्। जीवस्यापि तद्धर्म-साधने फलान्तराभाव इति ज्ञेयं। न पारयेऽहं निरवद्यसंयुजां स्वसाधुकृत्यं विबुधायुषापि वः। यामाभजन् दुर्ज्जयगेहशृङ्खलाः संवृश्चतद्वः प्रतियातु साधुनेति भगवद्वचनात् कृष्णप्रीतिरेव तत्प्रीतेः फलमिति सिध्यति। अत्रादर्शनात् यन्मर्माहतत्वं तदपि न दुःखजनकत्वं किन्तु परम सुखजनकत्वं इति दर्शयन् श्रीकृष्णः। एवं यदर्थोज्झित लोक वेद स्वानां हि वो मय्यनुवृत्तयेऽबलाः। मया परोक्षं भजता तिरोहितं मासूयितु मर्हथ तत्प्रियं प्रियारिति। अतः सुष्टुक्तमाश्लिष्य वेति। एतदष्टकमाहात्म्यं संक्षेपेण वक्ष्यामि। स्वरूपशक्तेः श्रीराधायाः प्रणयमहिमा कीदृशः राधया यन्मम माधुर्य्य मास्वादितं तदेव कीदृशं तदास्वादने यत् सौख्यं तत् कीदृशं वेति विचिन्त्य तदास्वादन लालसया परमतत्त्वस्वरूपः श्रीकृष्णः नित्यलीला पीठस्वरूपे वैकुण्ठप्रकोष्ठविशेषे गोलोकाख्ये श्रीनवद्वीपधाम्नि औदार्य्यप्रचुर भगवत्स्वरूपेण श्रीकृष्णचैतन्याकारेण नित्यं तद्भावयोग्यां लीलामातनोति। स च सप्ताधिके चतुर्दशशतशकाब्दे राधाभावद्युतिसुवलितमयेन श्रीचैतन्य-रूपेण गौड़देशान्तर्गतापरवृन्दारण्य इव श्रीमन्नवद्वीपनगरे श्रीजगन्नाथमिश्रपत्नी श्रीशचीगर्भे फाल्गुनपूर्णिमायां प्रादुरासीत्। शैशवे वयसि बालचापल्येन पौगण्डे विद्याभ्यासेन कैशोरे दारपरिग्रहपूर्व्वकसंसारचेष्टा प्रदर्शनेन भक्ति-प्रचारेण च गौड़क्षितिं परमानन्देन प्लावयामास। श्रीमध्वसम्प्रदायी परि-व्राजकचूड़ामणि ईश्वरपुरीसकाशात् दीक्षाग्रहणेन जीवानां साधु गुरुपदा-श्रयरूपं कर्त्तव्यं शिक्षयामास। चतुर्विंशवर्षे शाङ्कर सन्यासी श्रीकेशवभारती सकाशात् सन्यासं गृहीत्वा स्वगृहं त्यक्तवान्। तत स्तीर्थभ्रमणछलेन गौड़-पाश्चात्योढ्रदाक्षिणात्यप्रभृतिदेशवासिनो विशुद्ध भक्तितत्त्वं शिक्षयन् नानामत-वादिनां मतखण्डनानन्तरं चतुर्व्विधवैष्णवसम्प्रदायसिद्धान्तसाररूपमचिन्त्य-

**मत्प्राणनाथस्तु स एव नापरः ॥ ८ ॥**

इति श्रीकलियुग पावनावतार श्रीमत् कृष्णचैतन्यचन्द्रवदनाब्ज विगलितं श्रीशिक्षाष्टकं सम्पूर्णम् ।

---

भेदाभेदतत्त्वमूलकं स्वमतं स्थापयंश्च षड्वर्षाणि यापयामास । ततोऽष्टादश-वर्षाणि श्रीपुरुषोत्तमक्षेत्रे वसन् चतुर्दिक्षु भक्तिप्रचारकान् प्रेरयित्वा स्वमतं विस्तृतवान् । स्वयञ्च बहुसिद्धवैष्णवपरिसेवितः कदाचित् भक्तिप्रचारं कदाचिद्वा स्वीयोद्दिष्टत्रयसाधनरूप प्रेमास्वादनं कृतवान् । श्रीरूप सनातन-रघुनाथ-गोपालभट्ट-जीव-प्रबोधानन्द-स्वरूप-रामानन्द--कविकर्णपुरप्रभृतिभिः स्वकीय सिद्धपार्षदगणैः हृदिप्रेरणया स्वमत परिपोषकानि नानाशास्त्राणि-कारयामास । स कदाचिदपि सर्व्वसिद्धान्तपरिपूर्णमष्टकमिदं रचयन् सर्व्वा-नधिकार विशिष्टान् जीवानशिक्षयत् । कदाचिद्वा स्वीयान्तरङ्गसङ्गीद्वय स्वरूप-रामानन्दसहितस्तस्यतात्पर्य्यमास्वादयामास । एतत् सर्वं श्रीचैतन्य-चरितामृतादौविवृतमस्ति । श्रीमच्चैतन्यचन्द्रः स्वीय गृहस्थचरितेन स्वधर्म-परान् गृहस्थान् स्वीय सन्न्यासचरितेन च सर्व्वान् परिव्राजकांश्च पुनश्चोप-देश द्वारा सर्व्वान् जीवानशिक्षयत् । अस्य शिक्षाष्टकस्य माहात्म्यं अनन्तं ।

गौराङ्ग वक्त्राब्ज विनिःसृतं श्रीशिक्षाष्टकं ये प्रपठन्ति भक्त्या ।
ते गौर पादासवमुग्धचित्ताः मज्जन्ति प्रेमाम्बुनिधौ मुरारेः ॥ १ ॥
श्रीगौरचन्द्रस्य चतुः शताब्द एकाधिके भक्तिविनोदकेन ।
सम्मोदनाख्यं प्रभु वाक्यभाष्यं केदारनाथेन मया प्रणीतं ॥ २ ॥

माधुर्य्यरसास्वादि शुद्धवैष्णवानां सम्बन्धेऽस्य सर्व्ववेदसारत्वं भगवन्मुखाब्ज-गलितत्वान्महावाक्यत्वञ्च सर्व्वैरेव भाग्यवद्भिरष्टक मिदं कण्ठभूषणं कर्त्तव्यं सर्व्वदा पठनीयं पूजनीयञ्च ।

इति श्रीकलियुग पावनावतार श्रीमच्चैतन्यचन्द्रवदनाब्जविगलितं श्रीशिक्षाष्टकस्य सम्मोदनं नाम भाष्यं सम्पूर्णं ॥

---

## Goudiya Vaishnab Literature.

(Important works of 15th to 18th century.)

*Baladeb Vidyabhusan* :— 1. Vedanta sutra Govinda bhasya. 2. Prameya Ratnabali 3. Gita bhasya. 4. Vedanta syamantak. 5. Vedanta pithak. 6. Shiddhanta ratna 7. Upanishad bhasya. 8. Sahasranam bhasya.

*Ghanasyamdas* : Bhaktiratnakar. Narottam vilas

*Jib Goswami* :— 1. Krama sandarva. 2. Gopal champu. 3. Sath sandarva : (*a*) Tatwa sandarva. (*b*) Bhagabat sandarva. (*c*) Parmatma sandarva. (*d*) Krishna sandarva. (*e*) Bhakti sandarva. (*f*) Priti sandarva. 4. Srikrisnarchan dipika. 5. Sarva sambadini. 6. Brahma samhita tika, 7. Bhaktirasamritasindhu tika. 8. Ujjal Nilmani tika.

*Kabi Karnapur Paramananda Das* :— 1. Chaitanya chandrodaya natak. 2. Chaitanya charitamrita mahakabya. 3. Alankara kaustab 4. Arya′ satak.

*Krishnadas Kabiraj* : Gobinda lilamrita. Chaitanya Charitamrita. Krishna karnamrita tika

*Lochandas* :— 1. Chaitanya Mangal.

*Murari Gupta* : 1. Chaitanya charit mahakabya.

*Narottamdas* :— 1 Prarthana. 2 Prem bhakti

*Nityananda Das* :— 1. Prembilas.

*Prabodhananda Sarasvati* : 1. Chaitanya chandramrita. 2. Radha prem sudhanidhi. 3. Vrindaban satak. 4. Nabadwip satak. 5. Purusottam satak.

*Prem Das* : 1. Vansi vilash. 2. Vansi shikhsha.

*Raghunathdas* :— 1. Stababali. 2. Bhajanananda.

*Ramananda Rai* : Jagannath ballav. Prem chinta

*Rupa Goswami* :— 1. Bhakti rasamrita sindhu. 2. Vidagdha madhab. 3. Ujjal Nilmani. 4. Lalit Madhab. 5. Dankeli kaumudi. 6. Stabamala. 7. Padyabali. 8. Laghu Harinamamrita Vyakaran. 9. Laghu Bhagabatamrita. 10. Mathura mahatmya. 11. Natak chandrika. 12. Hansaduta.

*Sanatan Goswami* :— 1. Haribhakti vilash. 2. Bhagabatamrita. 3. Dasam tippani (Tosani) 4. Brihat Harinamamrita vyakaran.

*Vasudeb Sarbabhouma* :— 1. Chaitanya satak. 2. Tarka Nirash.

*Vishwanath Chakrabarti* :— 1. Bhagabat tika. 2. Bhagabat Gita tika. 3. Bhabanamrita. 4. Alakar kaustab tika. 5. Madhurya kadambini.

*Vrindaban Das* :— 1. Chaitanya Bhagabat.

*Yadunandan Das* :— 1. Karnananda Rasha.

## VAISHNAB PUBLICATIONS.

——:o:——

The prices include Postage and Packing. The V.P. P's are sent where Inland Postal rates apply, but remittances must invariably accompany foreign orders.

1. **Bhagabad Gita;** (*in Bengali character*) text, with commentaries of Valadeb Vidyabhusan and Bengali translation by *K. N. Dutt* Bhaktivinod, bound in cloth pp. 402 8vo. V. P. (Inland) Rs. 2/2 Foreign 4 shillings.

2. **Chaitanya Charitamrita;** (*in Bengali character*) a Bengali poem celebrating the life, deeds and teachings of Chaitanya Chandra; text, by Krishnadas Kaviraj, with copious notes by *K. N. Dutt.*, with 8 other Vaishnab works, bound in cloth two volumes, 12 mo. pp. 1704 & pp.330 V. P. (Inland) Rs. 5/8. Foreign 10s. 6d.

3. **Krishna Vijaya;** (*in Bengali character*) by Maladhar Basu, the first Bengali epic writer. closely printed. pp.217 8vo. Inland V. P. Re -/12 foriegn 1s.

4. Smaran Mangal Stotra; by *K. N. Dutt Bhaktivinod.* Sanskrit text, Sanskrit ellaborate commentaries with *Shikhsastak* (Sanskrit) and an introduction in English dealing with entire Vaishnab Philosophy 12 mo pp.72 + pp.64 (Inland) Re. 1 Foreign 1s. 6d.

5. **THE SAJJAN TOSHANI;** A mothly journal of Vaisnabism in Bengali character anual subscription Inland Re 1/- Foreign 2s.

*A complete price list in Bengali character can be obtained on application.* All correspondence and remittances should be addressed to Mr. R. P. Dutt. 181 Maniktala Street. Calcutta. India.

6. **THE SURYA-SIDHANTA;** [*in Bengali character*] An Astronomical work Sanskrit text with Bengali translatation by *B. P. Sidhanta Saraswati.* pp. 80 8 vo. (inland) V P Re -/12 Foreign 1s. 4d.

# Chaitanya Mahaprabhu,

## HIS LIFE AND PRECEPTS.

---

ALL LETTERS TO BE ADDRESSED TO—
R. P. DUTT, ESQ.,
181, Maniktala Street,
Calcutta, India.